CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 619

Title Laghuśabdenduśekharam

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 619 Subject: Grammar

Title: Laghuśabdenduśekhara.

Author: Nāgoji Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.9" by 4.4" Extent: 24 foll.

Language: Sanskrit. Script: Devanāgari

Remarks: Incomplete

॥

अद्धुसाव्देडुशेखरपत्र २४ [redacted]

ल॰श॰शे॰

श्री

श्रीगणेशायनमः॥ पातंजलेमहाभाष्येकृतभूरिपरिश्रमः॥ शिवभट्टसुतोधीमान्सतीदेव्यास्तुगर्भजः
याचकानांकल्पतरोररिकक्षहुताशनात्॥ शृंगवेरपुराधीशाद्रामतोलब्धजीविकः॥ नत्वाफणी
शंनागेशस्तनुतेऽर्थप्रकाशकम्॥ मनोरमोमार्धदेहंलघुशब्देन्दुशेखरम्॥ ॥ग्रंथसमाप्तिग्रंथप्रचारादिप्र
तिबंधकदुरितप्रशमायसमुचितरूपत्रयनमस्काररूपंमंगलमाचरन्शिष्यशिक्षायैव्याख्यातृश्रोतृ
णामनुषंगतोमंगलायचनिबध्नाति॥ मुनित्रयमिति॥ कारकविभक्तेर्बलवत्वाद्द्वितीया॥ परिभाव्येति॥
तच्छब्दस्यबुद्धिस्थपरामर्शकत्वात्प्राचामुक्तीस्तिरस्कृत्येत्यर्थः॥ मुनित्रयोक्तीर्विचार्येत्यर्थोवा॥ परिभा
वस्तिरस्क्रियेतिकोशात्॥ तिरस्कारार्थस्यधातोर्विचारार्थत्वेऽपिनबाधकंधातूनामनेकार्थत्वात्॥ अ
नएवपरैस्तुवोवक्तानइतिसंगच्छते॥ तेनस्वग्रंथस्यप्राचीनग्रंथैरगतार्थतासमूलत्वंचध्वनितम्॥ भा
विनोऽपिबुद्ध्याविषयीकरणादिदमितिनिर्देशः॥ सिद्धांतप्रकाशकत्वेनातिदुरूहग्रंथांतरेभ्यःसिद्धान्ता ॥२॥

ज्ञानेजायमानस्यक्लेशरूपसंतापस्यशामकत्वेनचकौमुदीसादृश्यं॥ अनेनवैयाकरणसिद्धान्ताविषयक
स्तजन्यज्ञानंप्रयोजनंतज्जिज्ञासुरधिकारीत्यादिसूचितम्॥ ॥अइउण्॥ एषांक्रमबोधकत्वेप्यादिरंत्येसे
नेत्यनेनैकवाक्यतयावृत्तिपरिच्छेदकत्वेनसंज्ञासूत्रत्वं॥ क्रमस्यसंज्ञाद्वारैवोपयोगात्॥ एकवाक्य
ताचादिरकारादिरंत्येनेतासहोच्चार्यमाणणकारादिनासहोच्चार्यमाणआद्यंतादिमध्यानांसंज्ञेति॥ स्वौजसित्या
दीनामप्येतदेकवाक्यतयासुबादिसंज्ञासूत्रत्वंस्वादिविधायकत्वंचेतिबोध्यम्॥ एषुसंहितायाअवि
वक्षयानसंहिताकार्यम्॥ अनुकरणत्वेनसौत्रत्वाच्चवर्णेभ्योनविभक्त्युत्पत्तिः॥ कारप्रत्ययोऽपिनबाहुल
कात्॥ यत्तूपजीव्यविरोधात्संधिर्न॥ तथा(पद)घञादिसंज्ञाग्रहकालेऽप्यकुणइत्यादीनामनिष्पत्यातद्प्रवृत्ता
(व) वूविकृतरूपाकारादिषुशक्तीनांइजादिशक्तिःपश्चादुक्तप्रत्याहारेणतेषूपेंद्रवात्रापितत्प्रवृत्तौविरुध्ये
त॥ नहिसंधिकार्येकृतेऽविकृतरूपश्रवणंभवतीतितत्त्वम्॥ पुनरच्यदस्यार्थान्तरेशान्तपयरदेणतद्वि

ल॰शा॰शे॰ रोधाभावात्॥ न च संधौ संदेहः आख्यानतो निर्णयसंभवात्॥ ननु चतुर्दशसूत्र्यामक्षरसमाम्नाय इति व्यवहा
रानुपपत्तिराम्नायसमाम्नायशब्दयोर्वेद एव प्रसिद्धेरित्यत आह॥ ॥माहेश्वराणीति॥ महेश्वरादागतानी
त्यर्थः॥ महेश्वरप्रसादलब्धानीति फलितम्॥ एवं चैवमानुपूर्वीका श्रुतिरेवैषा तत्प्रसादात्पाणिनि
ना लब्धा॥ श्रुतिमूलकत्वादस्यैव वेदांगत्वम्॥ अत्र प्रमाणं॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरा
त्॥ कृत्स्नं व्याकरणं प्रोक्तमिति शिक्षावचनम्॥ लण्सूत्रे णकारविषयाचार्यप्रवृत्तिर्ज्ञापयन्ति आ
ख्यानत इतिरित्यादावाचार्यपदेन महेश्वरः॥ अनुबंधाश्च महेश्वरकृता एवेत्यनुपदं स्फुटी भविष्यति॥
ञमङणनमित्यत्र मकारप्रत्याख्यानपरं भाष्यं तु किंचिददृष्टार्थमेव तदुच्चारणमुत दृष्टार्थमपीत्येवं वि
चारपरं॥ सर्वत्र प्रत्याख्यानमेवं परमेवान्यथांगानामपि पारायणे धर्मश्रवणेन तत्र तत्र पाणिनीया
सप्रत्याख्यानस्याप्यसंगतिः स्यात्॥ तदुक्तमिको यणचीति सूत्रे॥ सामर्थ्ययोगान्न हि किंचिदत्र ॥२॥

पश्यामि शास्त्रे यदनर्थकं स्यादिति॥ किंचिद्दृष्टादृष्टार्थवत् किंचिच्छुद्धादृष्टार्थवत् सर्वथानर्थकं न किं
चिदिति तदर्थः॥ वृद्धिसूत्रे स्थेवर्णेनाप्यनर्थकेन न भवितव्यमिति भाष्ये ग्रंथेऽनर्थकत्वं बोधार्थराहि
त्यरूपमिति॥ न निष्प्रयोजनत्वरूपानर्थक्यं तत्र तत्र पाणिनिप्रत्याख्यानभाष्यासंगतिः॥ अत एव सो
यमक्षरसमाम्नायः पुष्पितः फलितश्चंद्रतारकवत्प्रतिमंडितो ब्रह्मराशिरिति भाष्यमुपाददयोक्तं भर्तृ
हरिणा॥ यथैव वेदमध्युच्छिन्नं चंद्रतारकादिरेवमस्याक्षरसमाम्नायस्य न कश्चिदध्युच्छित्तिः॥ कर्तास्यैव
मेव वेदपारं पर्येण स्मर्यमाणमिति आधुनिकः शरीरी॥ पुष्पितत्वं तन्मूलकशब्दशास्त्रकारेण शब्द
प्रयोगेण च फलितत्वम्॥ उक्तं चैतच्चतुर्दशसूत्रव्याख्यायां नंदिकेश्वरकृतकाशिकायां॥ नृत्तावसा
ने नटराजराजो ननाद ढक्कां नवपंचवारम्॥ उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजा
लं॥ अत्र सर्वत्र सूत्रेषु अंत्यं वर्णं चतुर्दशं धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये इति॥ धात्व

शि॰शि॰

र्थम्॥ धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थं॥ अत एवानुबंधकरणार्थश्च वर्णानामुपदेश इत्युक्तं भाष्ये॥ अत्र
करणशब्दप्रयोगेणानुबंधानां सादित्वं सूचितं॥ तत्करणं चोपदेशकर्तृकर्तृकमेव॥ प्रत्यासत्तेः तेन त
द्व्यतिरिक्तस्य सर्वस्यानादित्वं सूचितम्॥ अत्र सनकाद्युद्धरणेच्छयास्य ब्रह्मोपदेशरूपत्वं सूचितम्॥ त
च्च श्रुतिताभावेन संगच्छते श्रोतव्यः श्रुतिवाक्येभ्य इत्युक्तेः॥ उक्तं च व्याकरणे शाकटायनेनापि॥ इदम
क्षरं छंदो वर्णशः समनुक्रांतं॥ यथाचार्योक्तं ब्रह्मा बृहस्पतये प्रोवाच बृहस्पतिरिंद्राय इंद्रो भरद्वा
जाय भरद्वाज ऋषिभ्य ऋषयो ब्राह्मणेभ्यस्तं खल्विमम् अक्षरसमाम्नायमित्याचक्षते न भुक्त्वा न नक्तं प्र
त कुर्याद्ब्रह्मराशिरिति ब्रह्मप्रतिपादको वर्णराशिरित्यर्थः तत्त्वं च नंदिकेश्वरकाशिकायां स्पष्टम्॥ अत
एव वृत्तिसमवायार्थो वर्णानामुपदेशः कर्तव्य इति भाष्ये उक्तं पाणिनेर्लाघवेन शास्त्रप्रवृत्तिफल
को यः समवायो वर्णानां क्रमेण निवेशस्तदर्थ इति तदर्थः स चाणादिप्रत्याहारद्वारा शास्त्रप्रवृत्त्यर्थः ॥३॥

एवं चायमुपदेशः पाणिनेरन्यकृत इति स्पष्टमेवोक्तम्॥ मंत्रोपदेश इतिवच्चोपदेशपदप्रयोगोऽत एवा
स्य ज्ञाने सर्ववेदपारायणजं पुण्यं फलमिति भाष्ये उक्तं व्याकरणमुपक्रम्य वेदानां वेद इति छांदोग्यश्रु ति
रप्येतत्परैवेति दिक्॥ तत्प्रयोजनमाह॥ ॥ संज्ञार्थानीति॥ एवं चोपपादितम्॥ संज्ञाप्रणयनं च लाघ
वेन शास्त्रप्रवृत्त्यर्थमिति बोध्यम्॥ संज्ञार्थत्वोपपत्तये आह एषामिति॥ आकारश्चेति॥ तेन रप्रत्याहारसि
द्धिः॥ अनंत्यत्वात् इत्युक्तिः इदं उण्व्यास्य सूत्रस्थकैयटानुरोधेन॥ परत्वे स्यादनुनासिकत्वे अतोऽत्रे
ति सूत्रे पाणिनिर्लकारं नोच्चारयेत् प्रत्याहारेणैव निर्वाहात्॥ किंचास्येत्संज्ञकत्वे यणघटितसूत्रे
षु वृद्धिषु अर्धमात्रालाघवानुरोधेन प्रत्याहारेणैव व्यवहरेत्॥ किंचानुबंधानामच्प्रत्याहारे ग्रहणा
भावे आचारादप्रधानत्वाच्चोपश्च बलवत्तर इति भाष्योक्तस्य तृतीयहेतोरव्यापकत्वापत्तिः तद्बलो
पस्यो बलवत्त्वेपि हल्प्रत्याहारासिद्धेः प्रागच्पदार्थनिष्पत्त्यभावे नोपदेशो जित्सस्य वाक्यार्थाभावे

नक्षणित्यकारस्येत्संज्ञालोपयोरभावेन प्रत्याहारेषु जातियहणपक्षस्येव भाष्यकृतासिद्धांतितत्वेन हस्वग्रहणे प्रत्याहा
रेलणित्यकारप्रवेशो मा मास्त्वाथस्येत्यत्रानुनासिकपक्षेनुस्वारापत्तिर्दुर्वारा सोस्तीत्यादेसुलोपापत्तिश्च॥ अ
तएव प्रत्याहारेनुबंधानां कथमज्यहणेषु नेत्यनेन प्रत्याहारे वर्णसमाम्नाये य एते हकारादयो बोधकसूत्रेषु प्र
रा त्याहार्था अनुबंधाः क्रियंते तेषामजयहणेन ग्रहणं कस्मान्नेत्यर्थके नाचू प्रत्याहारेशंकाकृता नहल्ग्रहणे प्रत्याहारे
भाष्येच अइउणित्यादि सूत्रचतुष्टयोपादाने नैवास्य प्रवृत्तिर्दर्शिता॥ तत्र प्राधान्यं प्रत्याहारेषु ग्रहणार्थ
त्वरूपम्॥ हल्सु चतथोपदेशस्तेषाम् अइउ स्वराणामेव तथोपदेशा इति प्राधान्यात्तेषामेव संज्ञित्व
मितिभाष्ये स्थितम्॥ नच हशादिप्रत्याहारेट ग्रहणस्यापत्तिरिति वाच्यं॥ हकारादिषु पुनः पुनरकारो
च्चारणार्थवर्णरहित हलांतघटितप्रत्याहारे ग्रहणाभावस्य वक्तुं शक्यत्वात्॥ तद्विषयप्रयोगाणामन
भिधानाच्च॥ तस्मादस्यानुनासिकत्वमप्रमाणिकं॥ उरण्रपर इत्यत्र लग्रहणं कर्त्तव्यमेवकृ लृवर्णयोः ॥४॥

अणिति अंजेः क्विपिसंयोगांतलोपे रूपं॥ तत्र न स्थवीति हत्वे अनुनासिके च तस्य हल्ग्रहणे नग्रहणं तु मोनुस्वार इत्यस्य स्यादिति
भावः॥ आनिति अनितेः क्विपि अनुनासिकस्य क्विझलोर्दीर्घसंबुद्धौ नलोपाभावे रूपासिद्धिः॥ एवं तु हस्वपाठे न तौ च रूपासिद्धि बोधं

सावर्ण्यवदित्याहुः॥ ननु हयेत्यादावकारोच्चारणेन तस्य हल्त्व प्रसंगोऽत आह॥ हकारादिष्विति॥ न पुनरं
तरेणाचं व्यंजनस्योच्चारणमपि भवतीत्युच्चैरुदात्त इति सूत्रस्थभाष्यात् एषा ह्याचार्यस्य शैली लक्ष्यते यत्तुल्य
जातीयं तुल्यजातीयेषूपदिशति अचोऽचु हलो हल्षु इति प्रत्याहारेनुबंधानामित्यत्र भाष्याच्चेति भावः॥ स्या
देतत्॥ नविभक्तावित्यादेः सार्थक्याय हलंत्यमित्यस्योपदेशेंत्यं हलिदित्यर्थाविशेषकत्वेन हलंत्यमादिरंत्ये
नेत्यनयोः परस्परापेक्षत्वेनान्योन्याश्रयात्ककारेत्संज्ञामबोधयित्वा हलामित्संज्ञाबोधनं पाणिनेरयुक्त
म्॥ नच हयवरेत्यादेरादेस्यशषसरित्यंतं समुदायमुद्दिश्य हलित्यनेन हल्संज्ञापि विधेयेति वाच्यम्॥
दशासूत्रावृत्तौ गौरवात्॥ ननूपदेशेऽजनुनासिक इत्सूत्रे अनुनासिक इति सूत्रत्रयमस्तु अजित्यनंतार्थे मूलती
येजित्यनुवृत्तिसामर्थ्याद्धलोपि इत्संज्ञा भवति न त्वनुनासिक एवेति नियमाश्रयणं दूरे प्रवृत्तो न हि पोयोगवि
भागसामर्थ्याच्चानन्तरस्येति न्यायं बाधित्वा व्यवहितस्यापि तेन नियमः सिद्ध्यतीत्याद्यपि ज्ञापकाच्चनवि
दशश्चेत्यादाबुपदेशे हलितिसूत्रेणेत्संज्ञाप्रसक्तिः कृ योशेषो नेत्यर्थः २

अनुनासिकपक्षे अकारनिर्यजे वेति नियमेनुमाहानां मित्वात्तापत्तेर्भिद्यत्वोत्पादितिज्ञापकमिति भावः ॥१

ल॰ शे॰ शे॰

परितनियमः एवंच हल्ग्रहणमपि व्यर्थमन्योन्याश्रयश्च न । न च पाणिनिसूत्रभेदे पारायणादावदृष्टहानिस्त
था च तत्र तत्र भाष्यमपाणिनीयं तु भवतीति वाच्यम् । कल्प्यमानन्यासस्य लघुत्वे स्यादोषत्वात् । सूत्रभेदं तमु
पाचरन्ति यत्र तदेवान्यत्सूत्रं क्रियते न्यूयो वा यदि तदेवोपसंहृत्य क्रियते नासौ सूत्रभेद इति स च उपसर्गान
इति सूत्रभाष्यात् । नासौ सूत्रभेद इत्यस्य दोषायेति शेषः सतिसंभवे दृष्टद्वारैवांगानामदृष्टार्थत्वमिति
तदाशयः । अत एव तत्र तत्र ज्ञापकपरसकलभाष्योच्छेदो देनेनिर्वाच्यं चेन्न । योगविभाग नियमज्ञा
पकाश्रयणेति गौरवात् । न हि वर्णाभिव्यक्तिजनककंठाद्यभिघातगौरवमेवाश्रयं न तु ज्ञानरजन
कमनोव्यापारगौरवमिति राजाज्ञास्ति । न च सत् आसमंतात् एति गच्छतीति सहेतामध्यमो वर्ण इ
त्यर्थ इत्यतो नान्योन्याश्रय इति वाच्यम् । अन्योन्याश्रयतत्परिहारादन्व दत्ता भाष्यकारेण क
टी वीत्यत्र प्रःसिद्धादीङ्गणावित्यत इणगतावित्यतश्च सणः इः इर्वावित्वज भाव बोधना । किं च योग ॥५॥

मर्यादयानत उक्तार्थालाभः आसमंतादित्यस्यानन्वितार्थत्वं व्यर्थत्वं च रूढौ तु न मानमतः सूत्राहत्यातंपरिह
रति । ॥ हलंत्यमिति ॥ भाष्येप्यन्योन्याश्रयमाशंक्य हलंत्यमित्यत्रं भवति लकारश्चेद्भवतीति वक्तव्यमित्यत्के
कशेषनिर्देशात्सिद्धं । हलचू हलचू हलू हलंत्यमित्यक्तम् । तस्यायं भावः ॥ हलेकशेषेण हल्यदेन संबंध
सामान्यषष्ठ्या समासोंत्यशब्दस्य च द्वंद्वांते श्रूयमाणस्यैवोभयत्रान्वयः ॥ एवं च हल्सूत्रान्त्यं हल्रूपां
त्यं चेति बोधः ॥ अंत्येराद्योत्तिर इतिवत्सष्ठीम इति ॥ अत्रोच्चारयितुरेकशेषनिर्देशे बोद्धुस्त्वावृत्या बोधः ॥
हसमीपो लकार इति हल्रूपांत्यं चेतिके यदोक्तव्याख्यायां तु हलित्संज्ञं भवति हलंत्यं चेभिदिति वदेद
त्त द्यम् । नन्वेवमपि न विभक्त्याविति विभक्तिपदबोध्यस्तु मिङ् बोधो हलंत्यमिति वाक्यार्थबोधोत्त
रं तद्बोधश्चापवादवाक्यार्थबोधोत्तरमित्यन्योन्याश्रयस्तदवस्थ एवेति चेन्न ॥ अपवादवाक्यार्थबो
धात्पूर्वं पदपदार्थोपस्थितावुत्सर्गवाक्यार्थबोधे प्रतिबंधकाभावान्नद्यभावज्ञाने प्रतियोगिज्ञा

नस्यैव प्रतियोगिज्ञानेऽभावज्ञानस्य कारणता कस्यापि संमता । प्रतियोगिज्ञानं विना निषेधवाक्यार्थासंभ
वाच्च पूर्वं ह्यपवादा अभिनिविशंते पश्चादुत्सर्ग इत्यस्य त्वयं भावः लक्षणैकचक्षुष्कस्य उद्देश्यतावच्छेदकावच्छिन्ने
सर्वत्रोत्सर्गकृतसंस्कारबुद्धावुत्सर्गापवादयोर्विरोधाय व्यवस्थानापत्त्या नुक्तवंतं प्रतिमास्तु व्यवस्था इति वाक्यस्ये
वापवादशास्त्रवैयर्थ्यापत्तेः सर्वमपवादशास्त्रपर्यालोचनेन तद्विषयलक्ष्यसंस्कारं नीत्वा यतद्विषयं तत्तद्संतन
द्विषयवाक्योपस्थवधारोत्सर्गेण संस्करोतीति । अन्यथा विकल्पापत्तिरिति । यद्यपि नुक्तवंतं प्रतीतिन्या
योन्नुणादिनाजातनिवृत्तेर्व्यभिचरितस्तथापि तत्राप्यनुत्पत्तिरेवेति न दोषः न्यायानंगीकारेपि विक
ल्पापत्तेः सत्वाच्च । अभिनिविशंत इत्यस्य बुध्यारूढा भवंतीत्यर्थः । लक्ष्यैकचक्षुष्कस्य तत्तच्छास्त्रप
र्यालोचनं विनापि अपवादविषयं परित्यज्योत्सर्गेण लक्ष्यसंस्कारं जानीते तस्यापि शास्त्रप्रक्रियास्मरण
पूर्वकं प्रयोग एव धर्मोत्पत्तेः तदुक्तं प्रकल्प्य वापवादविषयमुत्सर्गः प्रवर्त्तत इति । प्रकल्प्य परित्यज्य ॥८॥
प्रसक्तस्य न्नुणादिनानुत्पत्तिरेवान्वाख्यायते न तूत्पन्नस्य निवृत्तिः क्रियते नुक्तवंतं प्रतीतिन्यायेन सज्ञातस्य निवृत्त्यसंभवात् । अस्तु पे
त्याह । न्यायानंगीकारेपीति

प्रकल्प्येति । अपवादविषयं आत्मानं प्रकल्प्य कृत्वा यथा म्बयुवेत्यादिरुत्सर्गो न संप्रसारणइत्यादेरपवादस्य द्विषयो भवतीत
थात्मानं कृत्वा प्रवर्त्तते इत्यर्थस्तत्तदन्यथेत्यर्थः ।

यत्तु प्रकल्प्य वेत्यस्यायमर्थः । यथा न संप्रसारणे इति वचनात्परस्य यणः पूर्वं संप्रसारणं पूर्वस्य तु नान्तिमितः प्र
तिषेध इति अभ्यस्तसंज्ञासूत्रे कैयटस्तन्न । न संप्रसारणे इति सूत्रस्थभाष्यविरोधात् । तत्र हि एतदेवज्ञापयति पर
स्य न पूर्वस्येति । यद्वा संप्रसारणाश्रयस्य प्रतिषेध इत्याद्युक्तम् । न हि न्यायेनासिद्धे एवमुक्तिरुचितातस्मान्न्याय
स्य मदुक्तएव विषय इति बोध्यम् । यदप्यपवादवाक्यार्थं विना नोत्सर्गवाक्यार्थ इति तदर्थत्वस्यापि नउक्तयुक्तेः नवि
नक्तौ तु स्मा इतिशास्त्रपदार्थज्ञानमात्रेणापादीनामेतद्विषयत्वाभावबुध्यातेषुरूलंत्यसूत्र प्रवृत्त्यासुप्तिङ्रूपप
विभक्तिपदार्थज्ञानं सुलभमिति दिक् । अत्राप्युपदेशावां इति संबध्यते तेन दृल्लरल्लमाह । ॥सूत्रमिति॥ ॥
आदिरंत्येन ॥ आदिरिति दिक् । अंत्यशब्देन सर्वेषामादेपादिगादिप्रत्याहारेऽकारादिग्रहणं मा भूदिति भ
एव माद्विशब्देन परेषामाक्षेपात् । इणादिप्रत्याहारेषु आदीनां ग्रहणं मा भूदित्यंत्येनेति उभयोपादाने तु अयमा
दिरंतो वेत्यकेऽवशिष्टमपि किंचिदस्तीति नियमेन प्रतीतेः परस्मिन्सति यस्मात्पूर्वो नास्ति स आदिः प
वास्मिन्सति यस्मात्परो नास्ति सोंत्य इति अकारादिग्रहणे इकारणकारादीनाभाद्यंतस्यैवानापत्तेः ।
अत्राद्यंतपदाभ्यामवयवत्वेन बोधकाभ्यां स्वघटितः समुदाय आक्षिप्तः संज्ञी तस्य च स्वस्य प्रयोगाभा
तथा च न संप्रसारणे इत्यादेः परस्परसंप्रसारणं विनापवादत्वं नास्ति येन सूत्र इत्याद्युदाहरणे तद्विषयता
स्यादिति । तापकं विनान्यायस्यापि विषयोयमिति भावः ।

प्रतियोगिज्ञानेऽभावज्ञानस्य कारणत्वाभावात्
प्रतियोगिज्ञानं विना निषेधवाक्यार्थासंभवाच्चेत्यर्थः ।

प्रायेति शेषः एकाजिति पणे। हलंत्यमित्यत्र तस्मान्नित्यत्वात् हलोनंतरस्येत्यादे

वात्र त्येकं संज्ञित्वमंत्यस्य तु न तत्कार्यं तस्येत्संज्ञालोपाभ्यामपहारात्॥ एतत्फलितकथनमेव भाष्ये सूत्रे च॥ स्व
स्य च रूपस्येति॥ स्वमित्यनुवृत्तिपरत्वेन व्याख्यानं तु हेयमेवानुवृत्तौ फलाभावात्॥ इत्तेति किम्॥ अमङ्णने
तिणकारादेर्भिप्रत्याहारो मा भूदिति॥ सहग्रहणाच्च समुदाय एव संज्ञेति समुदायाद्वेकेत्यादेर्विभक्त्युत्पत्तिर्ना
ऽऽदिमात्रात्॥ नचांत्यस्येत्संज्ञालोपाभ्यामपहारादिरंत्येनेत्यसंगतम्॥ सूत्रे ऽपित्संज्ञायामपि इणादिशब्दे
श्रुतत्वाभावात्॥ अंत्येनेत्यस्येत्त्यसहचरेणेत्यर्थात्॥ व्यक्तिपक्षे एवमेवो चैत्यात साहचर्यप्रलौकिकवचात्र नत्व
॥भेत्रेत्याहुः॥ अचिश्नुधात्विति सूत्रे इणहृत्येव सिद्धे ध्वोरिति निर्देशां ज्ञापकादिणपरेणैवेति लणसूत्रे भाष्ये स्पष्टम्॥
हलंत्यं॥ अत्र पदद्वयसमासे त्यशब्दस्य पूर्वनिपातापत्तेः कर्मधारयो ग्यपहानासमासाभावस्य सूत्रकारशैलीसि
द्धत्वाच्च॥ यद्यपि सर्वोपि हलंतं समुदायं प्रत्यंतो भवति तथाप्यंत्यपदोपदेशपदाभ्यां प्रत्यासत्त्याऽज्ञातस्वस्वरू
पज्ञापकोच्चारणविषयसमुदायं प्रत्यंत्य इह गृह्यते अतएव मकारे संज्ञापरित्राणार्थस्य मोरुकारश्चरितार्थः॥
समुदायोपदेशएव सर्वत्र रुषितात्पर्येणावयवानां नांतरीयकतया तेषामज्ञातस्वस्वरूपकत्वाभावात्॥ उपदे
शेत्यमिति॥ तत्र विद्यमानोऽन्त्यमित्यर्थः॥ तेन इउण्णित्यादेरेणादीनां हस्वत्वात् सिध्धुत्तरं तज्ज्ञिधिः॥ अन्यत्र
त्वंतरंगत्वास्त्रायउच्चारणे नाभिव्यक्तस्य तदवधानेनैवेत्संज्ञा॥ पदार्थोपस्थितिरनुबंधविनिर्मुक्तस्यैव
उपदेशोत्तरकालेत्संज्ञेति नाज्झलाविति सूत्रभाष्यात्॥ धुडित्यादौ सानुबंधादिनभक्तिस्तु तेनैवानुबंधाविनि ॥७॥

योगिकत्वे नविशेष ऽणत्वात्

र्मुक्तोपस्थितेन तस्येवार्थवत्त्वात्सुलनाद्दित्संज्ञाकार्यं तु यत्र संज्ञा तत्रानर्थक्या तत्तदुपस्थाप्य एवस्य ष्टं चेदं तिसूत्रे शि
ता॥ मित्यत्र कैयटे वैयाकरणे चित्स्वरस्तु न तस्येच्चकारसदृशत्वेपितत्वाभावात्॥ विभक्त्यादिसंज्ञापि सूत्रांतर्गताना
मेवेति तत्रैव न विनक्काश्वित्यादीनां प्रवृत्तिः अतएवेदमङ्शित्वाद्यवणत्वात्सवर्णग्रहणं प्राप्तमप्रत्यय इत्यने
नानिषिध्यत इति भाष्योक्तं संगच्छते यत्त्वनेकाल्सूत्रे शित्वाच्छि शिग्रहणाभावेपि शित्करणाद्वेव सर्वादेशत्वमि
॥ति भाष्ये उक्तं तस्येत्संज्ञक शकारकरणाद्भूतपूर्वानेकाल्त्वमाश्रित्य सर्वादेशत्वमित्यर्थ इति न तद्विरोधः॥ अत्र
के॥चिदनुबंधा अनेकांताः अनवयवाः यो ह्येकांतः स काश्चित्तत्रोपलभ्यत एवायं तु न तथा तदर्थभूते विधेये कस्या
प्यदर्शनात्॥ हलंत्यमित्यत्रांत्यशब्दः परसमीपबोधकः सुदुइत्यादावादिशब्दः पूर्वसमीपबोधको नेकाल
॥शि॥दित्यादौ समीपे सामीप्यमूलकावयवत्वारोपेण च बहुव्रीहिः॥ स्पष्टं चेदमुपदेशेऽजिति सूत्रे भाष्ये॥ मप
र्यंतस्येति सूत्रकैयटे च॥ तेन डाणलाहविशादौ च न दोषः॥ अतएवोपदेशेऽजिति सूत्रे उपदेशाय हलं चरितार्थं त
द्धि अन्त्र ओं अदित इत्यादि वादितश्वेतीट्प्रतिषेधाभावाय॥ अनेकांतत्वे हि तत्प्राप्तिरित्याहुः॥ परेत्वेकां
ता एव शास्त्रे तत्रोपलंभादन्यत्रानुपलंभाच्च॥ अनवयवो हि काकादिरेकजातीयसंबंधेन गृह्यते॥ दृष्ट
पलभ्यते नेवमर्थं किंचानवयवत्वे लशकप्रत्ययादेरणादिरित्वानापत्तिः॥ प्रत्ययादित्वाभावात् एवमंत्य
त्वाभावादिशादेः शस्येत्वानापत्तिः उक्तार्थलाहगणिकत्वे तु लहलो न दोषः॥ किंच [illegible] कारवे
यर्थापत्त्यावयवत्वमेवन्याय्यं अतएव वृत्रछणरकठजिति सूत्रविहितकेणित्वप्रयुक्त इद्भिन्नं॥ ॥

तस्मिल्लोप इति भाष्ये॥ एकांतत्वमेवन्याय्यमित्युक्ते भ्योपदेशो ऽजिति सूत्रे उपदेशग्रहणं तु स्पष्टार्थमेव त्याकुः
स च चानुबंधसहित निर्देशो विधौ गुणिति कित्यादौ नकारे संज्ञकः स्पष्टं चेदं निष्ठासंज्ञासूत्रे भाष्ये॥ अत एवा
ऽच्येत्यादेर्नो संगतिः अन्यथा यत्राट्सूत्रे तत्र नाचूपरो नेष्यते च तत्र यत्र प्रयोगे इष्यते वृद्धिस्तत्र नाऽजिति तदसंग
तिः स्पष्टैव॥ अंतं किं वा चालः॥ हल्ग्रहणं किं चिरिणोतीत्यादौ धातोरंत्यस्य मा भूत्॥ आद्योच्चारणमिति॥ आ
द्यमुच्चारणमित्यर्थः॥ भावे घञिति भावः॥ तच्च प्रत्यासत्त्यैतच्छास्त्रप्रवर्तकाचार्योच्चारणमेव॥ आद्यत्वं मे या ज्ञात
स्वस्वरूपज्ञापकत्वं॥ उपस्याद्यर्थत्वात् हिशोरुच्चारणक्रियात्वात्॥ अत एवैकाच उपदेश इति सूत्रे केयटेनो
क्तमित्संज्ञाविधावुच्चारणवचन उपदिशिर्गृह्यत इति॥ आदेच इति सूत्रे ऽपि येषां स्वरूपज्ञापनायोच्चारणमुच्चार
णं तेषामेवोपदेशव्यवहार इति॥ तत्र सूत्रे भाष्ये ऽपि उद्देशश्च प्रातिपदिकानां नोपदेश इति प्रकृतसूत्रे भाष्ये ऽ
पि प्रत्यक्षमाख्यानमुपदेश इत्युक्तं॥ तस्य चोक्त एवार्थः॥ परं तु उपदेशे इति किमर्थम् अन्त्र आं अपः॥ कः पुन
रुद्देशोपदेशयोर्विशेष इति भाष्ये उक्तं॥ यदि प्रत्यक्षमाख्यानमुपदेशो गुणैः प्रापणमुपदेशस्तर्हि दृष्टः सघानि
ष्टेति विहितानां शतृशानच्कक्तवतूनामवयवस्येत्संज्ञानापत्तिः॥ तथा राजसूयसूर्याचित्याग्निचित्येत्यादिनि
पातनानुमितक्यवादीनां पादेरित्वानापत्तेः॥ वदः सुपीत्यत्रोच्चारितस्कनेतस्कं संबंधी अत एव तस्यापत्यमत
इञिति न्यासे ऽन्यशब्दसंबंधापत्यार्थस्यानुक्तरूपशेषत्वमुक्तमाकरे तस्मादत्र सूत्रे उपदेशशब्देनोद्देश ऽ
स्यापि ग्रहणं वक्तव्यमेवं चान्त्र आं इत्यादावपि प्राप्नोतीति॥ तेषां संग्रहो ऽस्य व्याख्यातिर्भवतियेन सा विशेषः ॥८॥

क इति प्रश्नः तत्संग्रहार्थमेव लोकव्यवहारेणापि तयोः संकीर्णत्वमुपपाद्यैतद्व्यावृत्तये तत्संग्रहाय चोपदेशेनेजनुनासिक
इति वक्तव्यं॥ किं पुनरुपदेशानशास्त्रमित्युक्तं वार्त्तिककृता॥ तत्र शास्त्रपदेन प्रयोगशासनकरणभूता धातुप्रातिपदि
कप्रत्ययनिपातागमादेशाः हलंत्यसूत्रे व्यवसितपदार्थत्वेन भाष्ये उक्ता गृह्यंते एवं च तत्संग्रहो अन्त्र आं इत्येतद्व्या
वृत्तिश्च सिद्धांतस्य च वार्त्तिकस्य बाहुलकात्करणे घञा प्रत्याख्यानं भगवता कृतं॥ किं च हलंत्यसूत्रे भाव घञंतो
पदेशपदानुवृत्तौ न वतष्टकुछ सावित्यादि विहिते घित्संज्ञानापत्तिः॥ परस्य सत्वेन कादेरंत्यत्वाभावात्॥ यद्युप
देशो प्रत्ययत्वादि विशिष्टोंत्य इत्यर्थ उच्यते तदोपदेश इत्यर्थ्यंत्यपदसामर्थ्येनैव तल्लाभात्॥ अत एवात्र सू
त्रे उपदेशग्रहणस्यानुबंधा अनेकांता इत्यस्थितपक्षे ऽन्त्र आं अटित इति प्रयोजनमुक्तं न तूत्तरार्थमित्युक्तं॥ न
च करणसाधनोपदेशशब्दानुवृत्त्या सिद्धे हलंत्यसूत्रे व्यवसितांत्यमिति वक्तव्यं के पुनर्व्यवसिता धातुप्रातिपदिक
प्रत्ययनिपातागमादेशा इति वार्त्तिकानुत्थानमिति वाच्यं॥ समुदायद्वारावयवस्याप्युपदेशाकरणत्वात्तदंत्यस्या
पि लोपापत्तिरित्याशयात्॥ भाष्यकृता चांत्यग्रहणसामर्थ्येन प्रत्याख्यातं॥ तत्रानुबंधाविशिष्टानां धातुत्वादि
तु धातुत्वादियोग्यघटितत्वाद्बोध्यम्॥ निपातानां द्योतकत्वेन ब्राह्मणवसिष्ठन्यायेन च पृथक्ग्रहणं अव
सितत्वं च धातुत्वादिना परिच्छिन्नत्वात् इति कैयटः॥ एवं चोक्त[illegible]रिविशिष्टप्रातिपदिकांत्यस्यापि लोपः
प्राप्नोतीति प्रातिपदिकानां प्रतिषेधो वाच्यो ऽकृत्तद्धितानामिति वार्त्तिककृतोक्तं॥ कुंचकारस्त्यादो अप
वादविषयपरिहारेणोत्सर्गप्रवृत्तेः॥ सर्वं प्रातिपदिकत्वेनादिलोपो न स्यादिति अरुदित्यादित्तम्फलो

भावान्नेत्संज्ञेत्यादिनाभाष्ये प्रत्याख्यातं ।। अत्राद्योच्चारणार्थकोपदेशपदानुवृत्तौ त्वस्य वार्त्तिकस्यानुत्थानमे
व स्यात् ।। उद्देशश्च प्रातिपदिकानां नोपदेश इत्यास्यैव सूत्रभाष्ये उक्ते ।। एतद्भाष्यैकवाक्यतया पदस्य ग्रहणं कृतात
त्युक्ते ग्रहणप्रातिपदिकानामुपदेशः कर्त्तव्यः संचकोमंजकं इति मा भूदिति भाष्ये उपदेशशब्दो ग्रहणं कर्त्तव्यमि
त्यर्थकः ।। तत्रानुवादरूपमेव संदेहनिवर्त्तकमिति बोध्यं ।। नन्वेवं तस्मिन्निति निर्दिष्ट इति सूत्रे षष्ठी प्रकल्प
कत्वं तस्येति पदे हेतुप्रिजङ्किङ्ग्य इत्यावपि षष्ठीप्रक्लृप्त्यापत्तिः ।। नच सनः सन्नेवादेशो भविष्यतीति बाधका
भाव इति वाच्यं ।। उपदेशाद्यच्चमाने इत्संज्ञा न प्रकल्प्येतेत्युक्तं भाष्ये तद्विरुध्येतात्रोपदेशपदानुवृत्ताविति चे
न्न ।। तस्यैकदेश्युक्तित्वेनासाधकत्वात् ।। तथाहि ।। तत्र उः मोह्रस्वादित्त्वीत्यादौ यत्र सप्तमीपंचमी चेत्कन्नयं नि
र्दिश्यते तत्र किं पूर्वस्य कार्यमथ परस्येति संदेहे परत्वानवकाशत्वाभ्यां पंचमीनिर्देशो बलवानिति सिद्धा
तिनोक्तं ।। तत एकदेशिना यथार्थं वा षष्ठी निर्देशः कर्त्तव्य इति समाधानान्तरमुक्तं यथाविषयं प्रागुक्तेषु मंत्रेषु
कार्यिणः षष्ठ्या निर्दिष्टा इति तदर्थः ।। तेषु सप्तमीनिर्देशस्य क्वचित्पूर्वत्र क्वचिदुत्तरत्वावश्यकत्वेनोभय
निर्देशे गौरवेणैषैकदेश्युक्तिः प्रत्याख्याता ।। षष्ठी ।। ततः परैरेकदेशिना षष्ठीपदानुवृत्त्या तस्मिन्नित्या
देरेव षष्ठीप्रकल्पकत्वमाश्रित्य यथार्थं वा षष्ठीत्येकदेश्युक्तिः प्रत्याख्याता ।। षष्ठीपदानुवृत्तौ गौरवादुभयो २८
ःप्रकल्पकत्ववारणाय परत्वानवकाशत्वयोरेकः पूर्वपरयोरिति पूर्वपरग्रहणस्य युगपत्प्रकल्पकत्वा

भावे ज्ञापकस्य चावश्यकत्वाच्चेयमप्येकदेश्युक्तिः ।। ततः पूर्वैरेकदेशिना तत्पदे हेतुमतिजित्यादौ दोषः शंकितः
।। ततः षष्ठीप्रक्लृप्तिमिवादिनैकदेशिनोक्तं स्यादेव दोषो यदा संज्ञा आदेशं प्रतीक्षेत तत्र खलु कृता यामित्संज्ञाया
लोपे च कृते आदेशो भविष्यति उपदेश इति दीर्घसंज्ञोच्यते इति ।। एवंच तदुक्तिर्व्यर्थेत्याशयः ।। तदग्रे उपदेश
पदाननुवृत्तिमभिप्रेत्य नानुत्पन्ने सन्निप्रक्लृप्तिर्भवितव्यं ।। यदा चोत्पन्नः सन् तदा कृतत्वात् सामर्थ्यात्पंचमीति
प्रक्लृप्तिर्न भविष्यतीति समाधानान्तरं कृतं ।। तत्र पूर्वत्वविशिष्टस्य सन उत्पादने पंचम्या उपदत्ययात्प्रवृ
त्त्यंतराभावान्नास्ति तस्याः प्रकल्पकत्वमिति तदर्थ कैयट आह ।। एवंच प्रकृतसूत्रस्थस्य सूत्रार्थप्रातिपा
दयिषया प्रवृत्तस्य भाष्यवार्त्तिकस्यैवैकदेश्युक्तत्वाद्भाष्यबलेन प्रौढिवादकल्पनं नोचितं लेख्या ।। सिद्धेश्र
।। अपइणित्यादीनामपि क्रमबोधकत्वेनार्थवत्त्वात्प्रातिपदिकत्वं चित्रङ् श्रोः कुरित्यादेरपि प्रातिप
दिकत्वं ।। लोपश्चेत्यत्रापि त्राकारस्य स्वरूपेणार्थवत्त्वात्प्रातिपदिकत्वं अनुबंधानामेकांतत्वे तु लोपोपी
त्यतो लोपग्रहणे अनुवर्त्तमाने पुनर्लोपग्रहणात्सर्वादेशत्वं बोध्यं ।। एकाच उपदेश इत्यत्र कैयटोपि चिंत्य ए
व ।। अन्योपि तज्जातीयश्चेत्य एव ।। एकाच उपदेशे आस्त्वे उपदेशे इत्यादौ तु भावसाधन एवेति सुधियो वि
भावयं ।। चेत्याहुः ।। ननु शास्त्रे तु नासिकोच्चारणाभावात्तत्वज्ञानं दुर्लभमत आह ।। ।। प्रतिज्ञेति ।
प्रतिज्ञाविषयानुनासिकवंत इत्यर्थः पाणिनीया इत्यस्य पाणिनिप्रभृतिप्रोक्ता वर्णा इत्यर्थः ।। प्राति

ज्ञाचार्यमेवमिति कथनं वर्णानां तत्त्वज्ञापको व्यवहारश्च ताभ्यां तत्ज्ञानं सुलभमिति भावः प्रतिज्ञातारश्च प्रसासस्ये
तच्छास्त्रकर्त्तार एवेति दिक्॥ ॥निर्देशादिति॥ तेषां तत्र ग्रहणे हि नासिकादीयणापत्तिरिति भावः॥ न चैवं विधानसा
मर्थ्याद्ग्रहणाभावः सिद्धः तस्यापि प्रत्याहारेष्वनुबंधाग्रहणज्ञापनद्वारैव यणाभावकल्पकत्वौचित्यात्तच्छास्त्रबाध
कल्पनापेक्षया स्यार्थस्यौचित्यात् निर्देशादित्युक्तस्य तन्मूलकत्वे तत्त्वविधानसामर्थ्यादित्यर्थ इति तात्पर्यं आदिना तद्भिन्न
पिरूषे रेकः सर्वेत्यादिसंग्रहः॥ ननु प्रत्याहारेऽनुबंधानां कथं अग्रहणेषु नेभवार्त्तिके प्रत्याहारशब्दस्य वर्णसमा
म्नाये प्रसिद्धिः प्रत्याहारेष्विताभित्यनुपपन्नमत आह॥ ॥आदिरंत्येनेतीति॥ वार्त्तिकेनाद्यत्वाच्छब्द्यमिति भावः॥
॥ ॥ऊकालोच्॥ ऊकुक्कुटरुते उकार एकद्वित्रिमात्रत्वप्रसिद्धेरकारादयो नोक्ताः ऊ इति एकद्वित्रिमात्राणां क्रमेणाप्र
त्वेषन्निर्देशाख्यानात् तेन ह्रस्वोच्चारणकालसदृशो ह्रस्वस्ततेस कालोऽयस्येति बह्वृचीग्दितस्फेलितमात्रोऽश्च॥ ऊश्चेति॥
ननु ऊकालो ह्रस्व इति वाक्येऽणग्रहणात् सवर्णग्रहणे सामर्थ्याद्दूसदृशो द्वित्रिमात्रयोरपि ह्रस्वसंज्ञायां प्रशयप्र
ह्रस्वेत्यादौ ह्रस्वस्येति तु कस्यादिति चेन्न॥ ऊ आजित्येवाज्ग्रहणसामर्थ्यात् सदृशोऽजित्यर्थे सादृश्यस्य व्याख्याना
कालकृतस्यैव ग्रहणमिति सिद्धे आधिकं कालग्रहणमुच्चारितसंबंधिकालसदृशकालकस्यैव संज्ञा न तु नेन
गृहीतसंबंधिकालसदृशकालकस्यापीत्यर्थे नास्त्येवातस्तदुक्तं भाष्ये यावत्तपरकरणं तावदत्र कालग्रहण
मिति॥ न चाजिति वर्णग्रहणे जातिग्रहणस्य दुर्वारत्वात्तित उच्छ्रमित्यत्र दीर्घात्पदांताद्वेति तु गायत्रि दितिरि ॥१०
वाच्यं॥ ज्ञापकासिद्धत्वेन न तस्या सार्वत्रिकत्वात्॥ अंतरंगत्वेन ह्रस्वत्वनिमित्तानित्यतुक् एव प्राप्तश्च॥ अज्ग्रह

णं प्रतत्स्येत्यादौ ह्रस्वेति तु गृह्याद्दृत्यर्थः॥ उच्चैरु॥ नात्रक्रांतिलतस्मुच्चैस्त्वमुपांशुप्रयोगेऽव्यासेः क्रांतिप्रकर्षस्याव्यवस्थितत्
त्वाच्च॥ किंतु स्थानकृतं उच्चैरित्यधिकरणशक्तिप्रधानमधिकरणत्वं योच्चारणे प्रतितत्वताल्वादीनां सभागत्वे एवेत्याशये
नाह॥ ॥ताल्वादीति॥ इदं प्राचामनुरोधेन वर्णसमाम्नायेऽकारस्य प्राथम्यात्कंठादीति वक्तुमुचितं एवमन्यत्रापि बो
ध्यम्॥ प्रयत्नप्रेरितो वायुर्यदोर्ध्वभागे प्रनिहतोऽचं व्यंजयति तदासउदात्त इति भावः॥ ॥अजिति॥ ऊकाल इत्यतस्तदनु
वर्त्तते॥ उदात्तत्वादीनामज्धर्मतायाएव लोकप्रसिद्धत्वेन स्वरप्राप्तो व्यंजनस्यापि विद्यमानत्वाद्येदं स्वरूपकथनपरवा
ध्यं॥ ॥आयेइति॥ यच्छब्दः फिषोंत इत्यंतोदात्तः जस्सुस्वाद्यनुदात्तः एकादेशउदात्तेनेत्येकार उदात्तः॥ अर्वाङ् इत्यभिमुखवा
च्यमुत्पन्नं फिषोंत इत्यंतोदात्तं॥ आद्यस्यशेषनिघाते नानुदात्तत्वं अर्वतमंचतीत्यर्थे कृदुत्तरपदप्रकृतिस्वरेणावातोदा
त्तत्वं॥ एकस्मिन्नच्युदात्तानुदात्तयोर्धर्मयोर्मेलनं विरोधादाह॥ ॥वर्णधर्माविति॥ बाहुलकादधिकरणे घञ् अर्श
आद्यजित्यन्ये॥ इयं त्रिस्त्रीस्पष्टार्था लोकवेदयोरुदात्तादिव्यवहारस्य प्रसिद्धत्वात्॥ ह्रस्वपदघटितग्रहणमित्यर्थः
॥ ॥अतंत्रमिति॥ स्वशास्त्रसंकेतितरूपेणाबोधकमित्यर्थः॥ किं त्वर्द्धमात्रारूपार्थबोधकमिति भावः॥ एवं च दीर्घादि
ष्वप्यर्धमात्रैवोदात्ता॥ इतआरभ्यनवसूत्र्याऽ अइत्यतः प्रागुत्कर्षेण स्याः त्रिपाद्यामपि प्रवृत्तिः॥ सर्वं चेदं भाष्ये स्पष्ट
॥ ॥अर्द्धमुदात्तमिति॥ इच्चित्स्तु सत्यासत्यनामेति वक्तव्या ख्येया॥ उत्तरार्द्धमित्यस्य चार्द्धमात्रातो वशिष्ट उत्तरो भाग इत्य
र्थः॥ ॥वेदे तु यथाप्रयोगं भातिशाख्यादस्माच्च व्यवस्था॥ ॥तस्य चेति॥ अनुदात्तस्येत्यर्थः॥ उदात्तेति॥ उत्तदात्तस्वरि
तयोः परत्वे सतीत्यर्थः॥ तयोः परत्वं चोपस्थितानुदात्तापेक्षयेव॥ अन्यत्र उदात्तस्वरितयोः परत्वाभावे॥ ॥प्रातिशा

स०शा०शे०

स्येइति॥ लोकेत्वनुदात्तएवेतिभावः॥ ह्रस्वस्वरितमुदाहरति॥ ॥कन्येति॥ किमोक्कदित्यन्तः॥ क्कातीतिकादेशोतिस्वरित
मितिस्वरितः दीर्घंतमुदाहरति॥ रथानामिति॥ येराइति॥ स्वरितोवानुदात्तेपदादावित्येकारः स्वरितः॥ नोदात्तस्व
रितोदयमिति॥ मेनिषेधस्तु उदात्तानुदात्तस्यस्वरितइत्यस्यैवानंतरस्येतिन्यायात्॥ स्वरितपरमुदाहरति॥ ज्ञान
चक्रमिति॥ अहेरित्यर्थेऽह्यः इत्रस्येत्यर्थः छंदसिवावचनंप्राङ्णौचयुपधायाइतिवचनाद्गुणाभावः॥ उदात्त
स्वरितयोरितिईस्वरितः उदात्तयणोहल्पूर्वादितितुनछांदसत्वात्॥ यछब्दः फिषइत्यंतोदात्तस्तदेकारोत्र
स्वरितः॥ सइति॥ उदात्तादित्वात्हिंसकइत्यर्थः॥ ॥मुखेति॥ उच्यतेसोवचनःबाहुलकात्कर्मणिल्युट्॥ मुख
सहितानासिकेतिविग्रहः तथावचनइतिसाधनंकृतेतिसमासस्तदाह॥ ॥मुखसहितेत्यादि॥ मुखेतिकिंय
मानुस्वाराणामेवप्रसज्येतएवंचांजनुनासिकइत्यत्रानुस्वारःस्यात्॥ नासिकेतिकिं॥ शक्त्याद्यवनुदात्तोप
देशेत्यादिनाकलोपोमाभूत्॥ ॥अष्टादशेति॥ यद्यपीदंनवधाकिंपूर्वेत्यत्रीनामानंत्यान्ततपाप्यष्टादशधा
मवित्वमकारजातीयादेरित्यर्थः॥ ह्रस्वत्वादीनांतत्तत्समानाधिकरणोदात्तत्वानुनासिकत्वादीनांचभेदमा
श्रित्यसंबोध्यं॥ एवमग्रेपि॥ ॥स्ववर्णस्येति॥ विहितस्येत्यर्थः॥ तेनद्धतिद्धवेतिविधेयस्येषत्स्पृष्टस्पृ
ष्टत्वेपिनक्षतिः॥ दीर्घाभावादिति॥ अतएवतुल्यास्यसूत्रेभाष्येऋतिसवर्णइत्यनेनपदद्वयेद्विलकारकाभावे
ऽकःसवर्णइतिदीर्घत्वेह्रोतकारइतिऌकारघटितप्रयोगःसंगच्छते॥ ह्रस्वाभावादिति॥ इदमेओङित्याहो ॥१९॥

भाष्येस्पष्टं॥ गानरोदनादौचतुर्मात्रार्द्धमात्रादीनामुपलंभेपि॥ त्रीयुकार्येउपयोगाभावाल्लोकेप्रयोगेषुप्रयोगाच्चनो
क्ताः अतएवानुदात्ततरस्याप्युक्तिः एकश्रुतेःस्वरांतरत्वेपीदमुपलक्षणं॥ तस्यालोकेपिसत्वात्॥ तुल्यास्य॥ तुल्यावास्यप्रय
त्नौयस्येत्यर्थः॥ आस्येनवमास्यंव्याख्यानात्तच्चवर्णपर्यायित्वात्स्थानमेवप्रयत्नस्पृष्टत्वमुपादानात्॥ प्रकृष्टोयत्न
आभ्यंतरः तस्यवर्णत्वस्यव्यवहितप्राग्भाविरूपप्रकर्षवत्वात्॥ जनकत्वंषष्ठ्यर्थः तत्रकार्यगतभेदंस्थानेषा
रोप्यभेदघटितंतुल्यस्यनिर्वाहः स्पष्टंचेदंभाष्ये॥ तदाहुताल्वादीति॥ शिक्षायांकंठादीनांकंठत्वादिनैवस्था
नत्वोक्त्यातद्रूपेणैवास्यभवच्छब्देनग्रहणमितितज्ज्ञागमेदमादायनोदात्ताद्युसावर्ण्यमंगइतिबोध्यं यस्येत
द्वयंयेनयदीयेनेतद्वयेनतुल्यमित्यर्थः॥ यत्तुष्वेकेषामितिनिर्देशाद्यावदास्यभवंतुल्यत्वंग्राह्यं अतएवचोःसाव
र्ण्यमाशंक्यनेतौतुल्यस्थानाविति भाष्येसमाहितं अतएवबलयोर्नसावर्ण्यंतं नतद्धानासाम्येत्याहैतौतोष्ठि
न्अपतएवप्रयत्नशब्देनयत्नमात्रग्रहणमितिपूर्वेयत्किंचित्प्रयत्नभेदेयत्किंचित्प्रयत्नैकमादायसवर्णसं
ज्ञेत्यर्थोज्जरोजमितिसवर्णइतिसवर्णग्रहणेनज्ञापकेनसाधितो भाष्येतेनस्थानांशेयावत्स्थानसाम्येइत्येव
स्यारसिकोर्थइतिप्रतीयते॥ नचयावदास्यभवतुल्यत्वविवक्षणेप्रयत्नग्रहणंव्यर्थंप्रयत्नस्याप्यास्यभव
त्वादितिवाच्यं॥ ह्रस्वदीर्घयोःसावर्ण्यानापत्तेः तयोर्जनकानामास्यभवानांवायुसंयोगानामतुल्यत्वात्॥ त
स्मादास्यभवानांकंठादीनामेवग्रहणमितिबोधनायतत्सार्थक्यात्॥ आस्येति॥ किंतरमा॥ जरोजरीतिलोपो
माभूत्॥

प्रयत्नेति किं वाक्यशेषः इति ॥ प्रेति किं ॥ शषयोः श्वासाघोषविवाराख्यबाह्यप्रयत्नसाम्येन तत्रैव दोषात् ॥ कस्य किंस्था
नमित्याशङ्क्याह ॥ ॥ अकुहेति ॥ यद्यपि सर्ववर्णोच्चारणे कंठव्यापार आवश्यकस्तथापि चकाराद्युच्चारणे तालव्यादिव्या
पारोपि तथा अकारादीनामुच्चारणे तु नेति भावः ॥ कचयोस्तु न सावर्ण्यं यावत्स्थानसाम्याभावात् ॥ भिन्नस्थानकप्र
नवैयर्थ्यापत्तेश्च ॥ अत्र कंठपदं कंठस्थानतत्समीपजिह्वामूलस्थानोपलक्षणपरं ॥ तेन कण्ठ्या वर्णा जिह्वामूले तु कुः प्रो
क्त इति शिक्षास्थानविरोधः जिह्वामूलीयस्यस्य च वर्णविशेषे रूढिरिति न व्यवहारातिप्रसंगः ॥ अत एव अयोग
वाहेषु जिह्वामूलीयगणनं भाष्ये तत्तद्वर्णोत्पत्तेः प्राक् तत्तत्स्थाने जिह्वास्पर्शाद्यनुकूलत्वेन तत्तद्वर्णानां तत्तत्स्था
नत्वं निर्णये अकुहेत्यादिकथनं साधारणधर्मबोधनाय अनुवादकं न त्वेतदेवं कंठादिस्थानविधायकमिति भ्रमि
तव्यं ॥ विसर्जनीयपदेनात्र सारूप्यात् ककाराश्रयस्य तस्य ग्रहणमत एवायोगवाहा विज्ञेया आश्रयस्थानभागिन इति
शिक्षायां न विरोधः ॥ ॥ दंताइति ॥ दंतसंयुक्तः इत्यर्थः ॥ अतो भग्नदंतस्याप्युच्चारणं न त्वत्ये वा ॥ उभयपक्षे धा
ये तेन न तत्र भव इति योगे नोपध्मानीयस्यौष्ठ्यत्वमित्याशयः हरूपेति ॥ रूढत्वाच्च न व्यवहारातिप्रसंगः ॥ ॥ नासि
काचेति ॥ चेन स्वस्ववर्गानुकूलस्थानसमुच्चय इष्यते ॥ अत एवैषां प्रातिशाख्ये नासिकायां भव इत्यर्थकनासिक्य
शब्देन व्यवहारः ॥ यत्त्वनुस्वारयमानां च नासिकास्थानमभिष्यते इति शिक्षोक्तेरेषां नासिकाकरणकं किंच स्थाने
त्वे कङयोः सावर्ण्यापत्तिः यावत्स्थानैक्याभावात् ॥ यत् किंचित्स्थानैक्येन तच्चेत् यमानामपि परस्परं सावर्ण्याप ॥१२॥
।त्तिरितितन्न ॥ कंठादीनामपि करणत्वस्यैवास्यप्रयत्नेन वर्णानिति भाष्यात् प्रतीतेः ॥ स्थानत्वव्यवहारस्तु व

~~स्वाभि अभिव्यक्ति~~ ॥ स्वाभिव्यक्तिजनकतालव्वादौ वर्णजनकवायुसंयोगाधारे वर्णाधारत्वारोपेण तत्तत्
स्था॰ स्थाने जिह्वाग्रादिसंबंधेन वर्णोत्पत्त्या जिह्वाग्रादौ तत्संबंधजनकप्रयत्नविशेषे स्पृष्टतादौ च करणत्व
व्यवहारः ॥ वर्णाभिव्यक्त्यनंतरभावी सावर्ण्यानुपयुक्त आंतरतम्यपरीक्षोपयुक्तश्च कंठविवारादिर्निष्ठविका
सादेरास्यबहिर्देशावच्छिन्नकार्यस्य जनको यत्नो गुणशब्देनोच्यते अकारादिनिष्ठानुनासिक्यस्य भेदत्वाद्गुण
स्यैतादौ गुणत्वेन व्यवहारस्तु कंठाद्यवच्छिन्नवायुसंयोगेनोत्पन्नेषु नासावच्छिन्नवायुसंयोगेन तद्रूपध
र्मोपपत्त्या एवं च नासिकायास्तत्र गुणजनकत्वाद्गुणानासिकाकारादीनां नासिकास्थानं नोक्तं मूले एको यमा
नामेकं नामनस्य गुणाभेदादन्यत्वं भवति अन्यदिदं हीनमन्यदिदमुत्तममिति दृष्टांतपरभाष्येण तथैव प्रतीतेः ॥
आत्मात्र प्रयत्नं दुदात्तत्वादीनां गुणत्वव्यवहारस्तु सावर्ण्यानुपयुक्तत्वात् रतम्यपरीक्षोपयोगित्वरूपसादृश्येने
ति बोध्यं ॥ ङादीनां तु तद्गुणरहितस्वरूपानुपलंभेनोभयावच्छेदेन वायुसंयोगोत्तरमेव स्वरूपोत्पत्त्या विनिगम
नाविरहेणोभयोः स्थानत्वमनुस्वारयमानां चेति शिक्षायां चेन ङादीनामपि संग्रह इत्युक्तमत एव कंठयोकार
इत्यादावुक्तानासिक्यानासिक्य यमानुस्वारा निश्चिस्थानानीत्युक्तं प्रातिशाख्ये नासि[redacted]क्या ङञणनमा इति
न व्याख्यातारः कंङयोः सावर्ण्यं तु न भवत्येव आस्ये तु स्यस्थेत्र प्रयत्नमिति वार्त्तिके किमास्योपादाने प्रयोजन
मिति प्रश्ने प्रयत्नविशेषणमास्योपादानमित्यकोक्त व्यावर्त्यत्वेन बाह्यप्रयत्नानां प्रदर्शयिष्यमाणात् तीयास्त
यापंचमाः अनुनासिकमेषामाधिको गुण इति भाष्येण तस्य बाह्यप्रयत्नत्वोक्त्याऽत्र सूत्रे नासिकाया आ

स्पर्शशब्देनतत्र तस्यप्रयत्नस्यचप्रयत्नशब्देनाग्रहणबोधनात् नासिकाऽऽस्यबाह्येभिवस्तांमतेतत्यग्रहणभावा
त्॥ अतएवबाह्यप्रयत्नानुपक्रम्यामोनुनासिकानहोनादिनोहजरा: स्मृता:॥ इषन्नादायणश्चेवश्वासिनस्तोकंव
फाद्य:॥ ईषच्छ्वासांश्चरोंविद्यादित्युक्तंशिक्षायां॥ नादेतिसंवारघोषयोरुपलक्षणं॥ श्वासेतिविवाराघोषयो:
नह्लाविल्कपलक्षणं॥ एचु: सर्वस्यक्लृतलृकारस्यचअनुनासिकस्यादृत्नादित्यलं॥ ॥ एदैतोरित्यादि॥ लो
कानुभवसिद्धार्थानुवादकेत्रपरवाक्यात्रप्रष्टत्यालृतानाम्पितत्स्थानत्वंबोध्यं॥ तथाचपाणिनीयशिक्षा॥ कंठ्या
वहाविचुयशास्तालव्या ओष्ठजावुपू॥ स्युर्मूर्धन्याऋटुरषादंत्यालृतुलसा: स्मृता:॥ जिह्वामूलेतुकु: प्रोक्तो
दंत्योष्ठ्यो व: स्मृतोबुधै:॥ एऐतुकंठ्यतालव्याओऔकंठोष्ठजौस्मृतो॥ अष्टौस्थानानिवर्णानामुर: कंठशिरस्त
था॥ जिह्वामूलंचदंताश्च नासिकोष्ठौचतालुच॥ हकारंपंचमैर्युक्तमंतस्थाभिश्चसंयुतं॥ उरस्यंतंविजानीया
त्कंठ्यमाहुरसंयुतं॥ इति॥ यत्तुदंतोष्ठादिसमुदितंस्थानमितितन्न॥ शिक्षायांदंत्योष्ठ्यकंठ्यतालव्याविता
दोतत्रभवइत्याधिकारविहितोयत: प्रत्येकमनुत्पत्यापत्ते:॥ दंतोष्ठ्यमित्यादित्वसंगतमेव॥ स्वांगसमुदाय
स्यस्वांगत्वाभाववच्छरीरावयवसमुदायस्यशरीरावयवत्वाभावात्॥ एतेनदंतोष्ठरूपमतिरिक्तंस्थानमि
त्यपास्तं॥ अष्टौस्थानानीतिप्रतिज्ञाविरोधाच्चेतिदिक्॥ सूत्रेप्रशब्देनविलक्षणार्थबोधोपिलोकेयत्न
प्रयत्नयो:पर्यायतेमितिध्वनयन्नाह॥ प्रयत्नोद्विधेति॥ क्वचिद्यत्नइत्येवपाठ:॥ चतुर्धेति॥ यत्तुस्वराणामूष्म ॥१३॥

ष्मणांचैवविवृतंकरणंस्मृतं॥ तेभ्योपिविवृतावेङौताभ्यामैचौतथैवचेतिशिक्षावाक्याद्विवृततरविवृततमयो:प्रती
त्यानाचूनत्वादितिस्तत्रभाष्यादूष्मणांईषद्विवृतत्वस्यप्रतीत्याचतुर्धेत्यसंगतमितितन्न॥ नाज्झलावितिसूत्रेणवि
वृतत्वव्याप्यानामेषांसवर्णसंज्ञानुपयुक्तत्वबोधनमित्याशयात्॥ भाष्यमतेतुसंवृतस्सप्रयत्न: एवंचेदैतोरोदोत
श्चनसावर्ण्यप्रसक्ति: प्रयत्नभेदादितिबोध्यं॥ नाज्झलावितिसूत्रमितिप्रयत्नभेदप्राप्तसवर्णाभावानुवाद
केसन्नत्स्यैवबोधकमतएवभाष्येतन्नवक्तव्यमितिनोक्तं॥ स्पृष्टादीनामाभ्यंतरत्वंबोष्टप्रभृतिकाकलकप
र्यंतरूपास्यांतर्गततत्तत्स्थानेषुजिह्वाग्रादीनांस्पर्शेषित्स्पर्शदूरावस्थानसमीपावस्थानरूपाभ्यंतरकार्यकारि
त्वाद्वर्णोत्पत्त्यव्यवहितप्राग्भावित्वाच्चबोध्यं॥ तत्रबहूनामेकेस्थानत्वेपिकस्यचिदुच्चारणेसम्यक्स्पर्श: कस्य
चिदीषदितिशिक्षाकारोक्तिमनुभवंचानुसृत्यविवेक्तव्यं॥ ॥प्रयत्नमिति॥ नपुंसकेभावेल्युट्॥ प्रयत्नमि
त्यपाठ:॥ नङ्तस्यपुंस्त्वात्॥ तथाचशिक्षा॥ स्वराणामूष्मणांचेत्याद्यनंतरमचोऽस्पृष्टा॥ यणस्त्वीषत्नेमस्पृ
ष्टा: शल: स्मृता:॥ शेषा: स्पृष्टाहल: प्रोक्ताइति॥ अचोऽस्पृष्टा: स्पर्शाभावेरूपविवृतत्ववंत:॥ यणस्त्वीषदित्यने
न तेषामीषत्स्पृष्टत्वमीषद्विवृतत्वंचबोधितं॥ नेमइत्यर्धे तेनशलामीषद्विवृतत्वं यणपेक्षयाधिक्यं धिक
विवृतत्वंचेतिबोध्यं॥ अत्रशिक्षोक्तव्याप्यधर्मवत्ताव्यापकधर्ममादायनसावर्ण्यमितियणांचवर्गादिभि
र्नसावर्ण्यमितिनाश्चितइत्यादौनयादि: परसवर्ण:॥ ॥विवृतमेवेति॥ प्राक्कियास्वशायांविवृतत्वंप्रतिज्ञेयमित्यर्थ:

ज॰शे॰शे॰

न च पंसंतेऽत्र ष्टुभावो जश्त्वमपवादत्वाद्बाधेतेति वाच्यं॥ औपदेशिकजश्त्वं तेजश्त्वबाधेन चरितार्थं आत्तुल्येऽशी जश्त्वं तेगोधुक्
मानित्यादौ किं हकारावस्थायां प्रसक्तं जश्त्वं भवत्कृतहकारस्य घकारे कृते पश्चात्प्राप्नोत्यपवादो भष्भावो न भवतीति संदेहे परत्वो जश्च नवनीति अशयात् ४

तेन दंडाठकादौ दीर्घसिद्धिः अन्यथा संवृतस्य ह्रस्वाकारस्य विवृतेन दीर्घेण सावर्ण्याभावात्तन्न स्यादिति भावः॥ दीर्घा
कारस्य विवृततरत्वं तु पाणिनिना ज्ञातुं कत्वान्नेतच्छास्त्रप्रक्रियोपयोगीति दिक्॥ तस्य प्रयोगे संवृतत्वे मानमाह॥
अ अ॥ प्रयत्नभेदाद्दीर्घाभावः॥ अत्रोद्देश्यपेसवर्णग्रहणं जातिनिर्देशो वानव्याख्यानात्॥ अधिकारत्वे फलमाह॥
त्रिपाद्यामपीति॥ अन्यथा गोधुङ्भानित्यत्र घत्वे जश्त्वानुनासिके धुभष्भावानापत्तिरिति भावः॥ वस्तुतो घत्वे
कृते जपदृतिवत्त्वापत्तिर्दोषः॥ न च तत्तत्परत्वाज्जश्त्वानुनासिकत्वयोस्तत्प्राप्तिरिति वाच्यं॥ विप्रतिषेधे परमि
त्यस्याथयोद्देशात्वेन त्रिपाद्यामप्रवृत्तेः॥ पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येत्यनेनैतस्याथयोद्देशा
त्वस्यैव बोधनात्॥ अन्यथा परस्यासिद्धत्वे विप्रतिषेधसूत्रस्यासिद्धत्वात्परिभाषारूपमिवास्यापि कार्यकाल
पक्षे तेनाकर्षणापत्तेरेतदेव भाष्ये वत्त्वमेवार्पस्तितं॥ अधिकारत्वादेवस्मुत्वंधुटिसिद्धं वाच्यमित्यादिचरितार्थं॥
एवं च यत्रानुवृत्तिस्तस्यासिद्धत्वं पूर्वत्वं च कश्चित्सपादसप्ताध्यायाः क्वचित्तत्रांतरसहितायाः तत्रायमर्थः॥
तोठ इत्यादावस्योपास्थितौ वाक्यभेदेनान्वयः॥ हृस्यठो भवति इदं च शास्त्रं पूर्वत्रासिद्धमित्यत एव नमुन इत्यादि
भिस्तन्निषेधउपपद्यते पूर्वत्रेति संग्रहक्रमवृष्टिं गत्रादिकियैवं तु तत्तच्छास्त्रंप्रतितस्यासिद्धत्वं प्रतिपाद्यते॥ त
नापवादस्य यप्रत्यपवादत्वं तत्रासिद्धत्वाभावप्यन्यत्रासिद्धं भवत्येव॥ असिद्धमिति॥ सिद्धं निष्पन्नं प्रवृत्त
सिद्धस्य प्रत्ययविधावित्यादौ तथा दर्शनात्॥ तद्भिन्नमसिद्धमनिष्पन्नमप्रवृत्तं यद्यपि लोके नारार्यानान
स्यैव प्रवत्तत्वं दृष्टं तथापीह शास्त्रप्रामाण्यात्प्राप्तौ शेषोपिशास्त्र प्रवृत्ताव प्रवृत्तौ च नियामक इति बोध्यं ॥१५॥

अत्र कार्या सिद्धे अस्त्वित्याद्यसिद्धिः॥ अस्त्र अन्त्रो इति स्थितेपरत्वान्मुत्वे तस्य सपादसप्ताध्यायीस्थकार्ये दृष्ट्या असि
द्धत्वेपि देवस्तत्र तत्तन्यायेनाकाराभावेन पररूपाद्यनापत्तिः॥ अतिदेशस्यारोपरूपत्वान्निरधिष्ठानारोपासं
भवेन कार्यप्रवृत्तेरत्र पक्षे आवश्यकत्वात्॥ शास्त्रासिद्धत्वे तु यत्राप्यंतरंगत्वात्त्रैपादिक प्रवृत्तं तत्रापि तत्तच्छा
स्त्रे एवाभावारोपणान्निवृत्तिबुद्धेस्तावश्यादेशबुद्ध्याभावो न स्याज्जातत्वबुद्धेर्भावस्य॥ जायमाने कार्यत्वादेशावस्था
निबुध्यप्रवर्तते॥ न हि रजतभ्रमप्रयुक्ता प्रवृत्तिः शुक्तिं न गोचरयतीति न दोषः यत्र तु सरूप्रसंगस्तत्रा प्रवृत्तिरेवाभा
वात्॥ न च पूर्वत्र नेत्येवसूत्र मस्त्विति वाच्यं॥ पूर्वत्रशास्त्रप्राप्तौ निषेधइत्यर्थे नलोपः सुब्विति सूत्रासंगतेः॥ तद्विनि
यमार्थं॥ तद्धीयाराजन्नस्वइत्यस्यां दशायां कस्यापि पूर्वशास्त्रस्याप्राप्त्यतन्निषेधाप्रवृत्तौ नलोपे जाते उक्तवंत
मितिन्यायैनैतद्प्रवृत्तौ राजाश्वेदीर्घसिध्यानियमानुपयोगात्॥ राजन्याम्नित्यादौ अपि दीर्घापत्तेश्च॥ पूर्वशा
स्त्रविषयसंभावनायामित्यर्थे राजन्यामित्यादौ नलोपे सुब्विधिदीर्घविषयसंभावनया सर्वथानलोपानापत्तेरि
ति दिक्॥ बाह्यप्रयत्नइति॥ काकलकाधस्तात्कलविवरसंकोचविकासश्वासोत्पत्तिध्वनिविशेषनादतद्विशेषरू
पघोषाल्पघोषप्राणाल्पत्वमहत्त्वरूपकार्यकरत्वमेषां॥ तथाहि॥ आत्माबुध्यासमेत्यार्थान्मनो युक्ते विवक्षया
॥ मनः कायाग्निमाहंति सप्रेरयति मारुतं॥ सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः वर्णान्जनयते इति शिक्षा
यामुक्तं॥ आत्मांतःकरणसंस्काररूपेणगतानर्थान्बुध्यास्वहत्यासमेत्यैकबुद्धिविषयान्कृत्वा [illegible] धनेच्छ
या मनः युक्तं करोति तदिच्छावन्मनः कायाग्निं जाठरमभिहंति स कायाग्निः सोदीर्णः स मारुतः उदीर्णः ऊर्ध्वं

त.श.शे. प्रेरितवृत्त्यादित्यर्थः॥एवंचशब्दप्रयोगेछयोत्पन्नयत्नाभिरुतास्नेनानाभिप्रदेशात्सदेशात्प्रेरितोवायुर्वेग
न्मूर्द्धपर्यंतंगत्वाप्रतिनिवृत्तोवक्त्रंप्राप्यउक्तयत्नसहायेनतत्तत्स्थानेषुजिह्वाग्रादिस्पर्शपूर्वकंतत्तत्स्थानान्याहत्य
वर्णानभिव्यनक्ति॥ततोयत्नविशेषेणगलविवरविकासादीन्करोतितत्रयेतत्तत्स्थानाभिघातकाद्यत्नास्तआभ्यंत
रतत्तत्कार्यकारित्वादाभ्यंतराइत्युच्यंते॥गलविवरविकासादीकराश्चास्यबहिर्भूतदेशेकार्यकरत्वाद्बाह्याइति।
मात्राकालिकत्वादिरूपह्रस्वत्वादिकंतुवाय्वल्पत्वमहत्त्वप्लुतमितिनाभिप्रदेशात्प्रेरकयत्नएवकश्चिद्विलक्षणो
ऽल्पवायुंप्रेरयतिकश्चिदधिकमितितस्यवायुप्रेरणारूपंकार्यमास्यबाह्यदेशमितितदपिबाह्यमेवातएवाइउ
ण्सूत्रेभाष्येह्रस्वत्वादिजनकयत्नस्यास्यविशेषणेनसवर्णस्तत्रेऽग्रहणमित्युक्तं॥यद्यप्येकएवयत्नःसर्वकार्यज
नकोवर्णानाशकश्चेतिपरःसंनिकर्षइतिसूत्रेभाष्येउक्तं॥तथापितत्तत्कार्येणोपाधिनाएकोस्मिन्नपिभेदमारो
प्यतथाव्यवहारइतिबोध्यं॥उदात्तादिजनकयत्नस्याभ्यंतरकार्यत्वेपिउदात्तादिशब्दैर्विनाबोधितानांतेषाम
नङ्गदात्तइत्यनेनाविवक्षाबोधनात्॥सवर्णसंज्ञानुपयुक्तत्वांतरतम्यपरीक्षोपयुक्तत्वरूपसादृश्येनबाह्ये
षुगणनं॥इहह्रस्वत्वादेरनुनासिकस्यचोपलक्षणं॥ ॥श्वासइति॥श्वासाश्चानुप्रदानंबाह्यप्रयत्नः॥विवृतएव
तिइति॥तदभिव्यक्तस्तत्रजायमानेकंठविवरविकासेतेषांकर्तृत्वविवक्षाबोध्या॥विवारणांप्रयत्नइ ॥२५॥
तिभावः॥ ॥अयोविति॥वर्गतृतीयचतुर्थपंचमास्तथमाहकारानुस्वारोयरलवाइत्यर्थः॥नादस्तागिनः

तत्प्रयत्नकाःयद्यपिखयारिषुघोषाघोषान्यतरप्रयत्नमात्रेणापिप्रक्रियांशानिर्वाहस्तथापिशिक्षानुरोधेनान्येषामु
क्तिः॥ ॥अल्पासवो॥अल्पप्राणाःयतरातदुच्चारणोत्तरंप्राणानामल्पत्वमिवभवति॥वर्गेष्विति॥विद्यमाना
नामितिशेषः॥चतुर्णामिति॥निर्धारणेषष्ठी॥अन्यतमादितिशेषः॥पूर्वसदृशाइति॥सादृश्यंयूत्वठतंअत
एवायोगवाहेषुयमानांगणनंभाष्येचत्वारश्चयमाःस्मृताःइतिपाणिनिशिक्षाचसंगच्छते॥अयंचवदेणवत्तहा
ह॥ ॥प्रातिशाख्येइति॥अन्येषामितिअचामुक्ताअन्यहलांचेत्यर्थः॥यरलवाश्चेति॥येनाचाम्यंपियहणं॥
॥सुपांसुलुगितिसूत्रेइकारस्यांतर्यतोइकारइतिभाष्यात्॥घोषसंवारनादाल्पप्राणत्वमचां॥अन्यथा
तदोपर्यायेणास्यातांग्॥अल्पप्राणत्वानंगीकारेद्धोपयर्यायेणस्यातांअचांघोषवत्वंपरःसंनिकर्षइतिसू
त्रेभाष्येपिस्पष्टं॥अन्येइति॥द्वितीयचतुर्थौतथमौशषसहाःअयोगवाश्चेत्यर्थः॥जीह्वामूलीययमादीनां
स्थानबाह्यप्रयत्नकथनंलुस्वरूनिर्णयायनतुसावर्ण्यांतरतम्यपरीक्षानुपयोगीतिबोध्यं॥अनुपयुक्ताइ
ति॥तुल्यास्यसूत्रेप्रशब्दग्रहणात्॥उपयुक्तत्वेहिशछयोरपिसावर्ण्यंस्यादितिभावः॥आंतरतम्यपरी
क्षाचघोषवतइत्यादिनातत्रतत्रस्फुटीभविष्यति॥स्पर्शाः॥तसस्वमवरूपार्थाः॥अंतस्थाशब्दआदंतः
स्पर्शोष्मणोरंतर्मध्येतिष्ठंतिइतितदर्थः॥ऊष्माणइति॥ऊष्मावायुस्तत्प्रधानाइत्यर्थः॥एवंसोष्माण
इत्यस्यवायुनासरूवत्तंतेइत्यर्थइतिप्रातिशाख्यभाष्येस्पष्टं॥यद्यपिवर्गद्वितीयचतुर्थयोरपिस्थानेतर

नमस्तु भाष्यादूषकत्वं तथापि विहितमूषमणामित्यत्रैतरावष्टंभते॥ अन्यथा ककारादीनां सावर्ण्यानापत्तौ नाज्झला
वित्यादिनिर्देशासंगतिरिति भावः॥ ॥अचः स्वरा इति॥ उदात्तादिभिः स्वयमेव राजंत इति व्युत्पत्तेः॥ न च मंत्वादु
दात्तादयोपि स्वरा उच्यंते॥ ॥कपाभ्यामिति॥ खफयोरप्युपलक्षणं॥ अ ॐ इत्फयलक्षणमिकारादेरपि तस्य॥
॥ ॥अचः पराविति॥ ऌवर्णयोरिति॥ आ चलवृत्वर्णश्चेति विग्रहः कृत्यक इति प्रकृतिभावः एतदर्थमेव वर्णपदे द्वौ
ऋकारपाठः अन्यथा तस्यासत्वशंकाया अस्य वचनस्यैवाशक्यकं त्वं स्यात्॥ ध्वनितं चेदमेओङिति सूत्रशेषे भाष्ये
॥ तत्र हि सध्यंते त्याही हलोनंतरा इति सूत्रे प्रत्याहारघटके षयि ग्रहणके न शास्त्रप्रवृत्त्या मात्राकालस्येयद्धपादेरण
दित्सूत्रेणयाद्रिग्रहणेन ग्रहणाद्धि व्यंजनाश्रयो विधिर्न प्राप्नोतीत्याशंक्य मात्रिकव्यंजनानुपदेशात्तु पदिष्टस्यास
त्वात् अपसत्प्रतिपत्तेरशक्यत्वान्न॥ अणुदित्सूत्रेण तद्ग्रहणमित्युक्तं॥ न च क्रमसन्निवेशस्यादावनंत इति निषेध
तक्कृतानापत्तिः॥ ऌवर्णयोः पृथगनुबंधत्वकरणेन क्वचित्सरस्परग्राहकत्वकल्पने नादोषात्॥ ॥अकारक
योरिति॥ एकारस्य तालव्यमोकारस्यौष्ठ्यत्वमिति मते एकारव्याकारादीनामप्युपलक्षणमिदं॥ एतेन नाकश
लावित्येव सूत्रयितुमुचितमित्यपास्तं॥ एशि चेत्येव सिद्धे अतो गित्याकारे आवृत्त्यर्थं॥ सूत्रे द्विवचनोपपत्तये मध्य
मपदलोपि समासं दर्शयति॥ ॥आकारसहित इति॥ अत एव वेलाश्विति निर्देश उपपद्यते समाहारद्वंद्वे तु टच् प्रसं
गो ज्झलिति समाहारद्वंद्वं कृत्वा आपदेन द्वंद्वे तु अज्भिरप्याकारस्य सावर्ण्यं न स्यादिति भावः॥ अत एव भाष्ये प्र
यत्नभेदेनैषां सावर्ण्याभावं सिद्धिं साधितः॥ अंतेषु परेष्विति॥ इदमुपलक्षणं एतेषु विद्यमानस्येसपि बोध्यं॥ ॥१२॥

तेन ऋकारादीनामकारादिषु परतो दीर्घादिसंग्रहः॥ अच्त्वं स्यादिति॥ अच्पदबोध्यत्वं स्यादित्यर्थः॥ इदं प्रत्याहारघटकेष्व
पि ग्राहकशास्त्रप्रवृत्तिरिति मते व्यक्तिपक्षे च बोध्यम्॥ अणुदि॥ अणस्तु हि स्वसवर्णबोधकता त्र विधीयते॥ सवर्ण
स्येत्यस्य बोधक इति शेषः॥ आद्रेंत्वादौ सवर्णग्रहणं वारणीयाह॥ प्रतीयत इति॥ परं तु अप्रत्ययग्रहणमेकदेशानुमत्या
भाव्यमानेन सवर्णानां ग्रहणं नेति परिभाषां ज्ञापयतीत्युक्तं प्रत्ययपदस्य तदर्थत्वं तु न युक्तं वार्त्तिककृता दित्करण
मित्युपसंख्यानोक्तेः॥ भाष्यकृता चाप्रत्ययग्रहणमेतत्परिभाषाज्ञापकमित्युक्तेः॥ ज्यादादीयस इति सूत्रे भाष्ये ध्वनि
तमिदं॥ तर्हि किमर्थमाद् इत्युच्यते ज्याद् इत्येवोच्यतां का रूपसिद्धिः॥ आंतर्यतो दीर्घस्य दीर्घो भविष्यति एवं तर्हि ए
मेव ज्ञापयति भवत्येषा परिभाषा भाव्यमानेनेत्यादित्वदुक्तव्याख्याने हि पूर्वपक्षसिद्धांतयोरुभयोरपि निर्दलता
पत्तिः॥ जातिपक्षे त्वनयैव परिभाषया सवर्णग्रहणं वारणीयं व्यक्तिपक्षे गुणाभेदकत्वप्रासंच वारणीयं तेन घ
टवदित्यादौ नानुनासिको वकार एतेनाणुदित्येव सिद्धे अण्ग्रहणेनाणस्तु गुणाभेदकत्वं ज्ञायते॥ इति परास्तमिस
कुः॥ ननु चोरित्यादावनुवादे कथमुदित्वमिति चेन्न॥ व्याकरणांतरेणाणामुदित्संज्ञाकत्वेनादोषात्॥ उपदेश श
ब्दस्य करणसाधनत्वेन शास्त्रपरत्वेऽस्यापि शास्त्रत्वेन तत्प्रश्ने सुलभत्वाच्च चोभिन्नक्रम इत्यादौ द्विशेति॥ यद्य
पि समुदायसवर्णिनो अप्रसिद्धास्तथापि तदवयवादिसवर्ण एवात्र तत्सवर्णबोध्याः॥ ह्रस्वाकारायोरपि का
लपुरुषाद्युपाधिभेदेन स्थानेषु भेदमारोप्य तुल्यस्थानत्वं संपादं॥ ॥अत्रेति॥ ग्राहकसूत्र एवेत्यर्थः॥ व्या
ख्यानादिति भावः॥ उपसर्गाद्धतीत्यादितपरकरणादिति तु न युक्तं॥ ऋकारग्रहणेन चारितार्थ्यात्॥ एवमि

णापि परत्वेव॥ अचिश्नुधात्विति सूत्रे ऊण इत्येव सिद्धे य्वोरिति गुरुनिपातितं दैर्घ्यं व्याख्यानाच्चेति लण्सूत्रे भाष्ये स्प
ष्टं॥ नन्वेवमस्य चाविंत्यादौ सवर्णग्रहणं न प्राप्नोति अण्ग्रहणेन वर्णसमाम्नायस्थानामेव ग्रहणेन णकारा
दिचिह्नेन प्रत्याहारे तत्प्रत्यभिज्ञानेन तत्रत्यानां वर्णानां पठितेषु उच्चारितभेदेन गृहीतेषु सूत्रस्य चारितार्थ्येन
व्यक्तिपक्षे तत्रत्यात्र त्यव्यक्तौ भेदेन प्रकृते प्रत्याहारघटकं द्वितीयवर्णादौ चोच्चारितस्यैव ग्रहणं कृत्वा दृत्र(?)
वृत्तेरिति चेन्न॥ जातिपक्षाश्रयणेनादोषात्॥ अत एवानेकतरादीनां कत्त्वादिसिद्धिः सूत्रे अण्ग्रहणं च
न कार्यं॥ ऋलृवर्णयोः सावर्ण्यमित्यनेन समानजातित्वस्यैवातिदेशेनोपसर्गादृतीत्यादौ न दोषः॥
त एदैचोर्व्यतिरिक्तसवर्णेऽसमानजातित्वसत्त्वात् पृथगनुबंधकरणं च न रूपसिद्ध्यर्थमिति प्रयुक्तं॥ कार्य
संकरो यथा व्यक्तिपक्षे अइउण्सूत्रे शेषोक्तभाष्यरीत्या तपरसूत्रस्य जातिग्रहणप्राप्तसवर्णग्रहण
नियामकत्ववदप्रत्यय इत्यस्य योगविभागेन तत्प्राप्तसवर्णग्रहणनिषेधकत्वात् त्यदादीनाम इत्यादौ न
दोषः॥ एवं गुणाभेदकत्व प्राप्तसवर्णग्रहणनिषेधकत्वमप्यस्य बोध्यं॥ अत एव घटवदित्यादौ
नानुनासिको वकारः॥ सामर्थ्यादिति॥ एचोयवायाव इत्यादौ स्थानेन्तरतमसूत्रेणैव निर्वाह इति व
दता तेन घाभ्यामित्यत्र ऐऔ स्वरूपेणापाठ्यौ॥ वृद्धिरादैजित्यत्राप्येङित्येव पाठ्यं॥ तत्र गुणसूत्रे च प ॥२७॥
रस्परसवर्णसंज्ञा वा॥ देमेत च तु णोर्ग्रहणसत्त्वात् अत्रैतत्सूत्रवैयर्थ्योपन्यासेन तत्कालकस्य गुणवृद्धि

संज्ञाविधौ प्रत्याहारघटकग्रहणवैयर्थ्यस्य तुल्यत्वेवरचोक्तस्येत्यत्र तत्ग्रहणवैयर्थ्यस्य च संग्रहो बोध्यः॥ प्रयत्न
भेदेनाप्यसावर्ण्यमेतयोः प्रयुक्तं न विस्मर्तव्यं॥ यद्यपीति॥ इदं व्यक्तिपक्षे॥ वर्णानामुपदेशस्तावदुपदेशोत्तरकाले
संज्ञा ततउरमाद्दिरंत्येनेति प्रत्याहारस्तदुत्तरकालं सवर्णसंज्ञा तदुत्तरकालं अणुदिदिति एतेन वाक्येनान्यत्र स
वर्णानां ग्रहणं भवति॥ न चात्रेकारः आकारं गृह्णातीति नाज्झलाविति सूत्रे भाष्योक्तवाक्यापरिसमाप्तिन्यायादित्य
र्थः॥ अयं भावः॥ आदिरंत्येनेति प्रत्याहारसिद्धौ नाज्झलावित्येतद्वाक्यार्थबोधे सति निर्णीते तद्विषयपरिहारे
ण सवर्णसंज्ञाबोधनिश्चये अणुदित्सूत्रेण तावतां ग्रहणं बोधनीयमन्यथा बाधकसंभावनया तुल्यास्यसूत्र
जशक्तिग्रहेऽप्रामाण्यसंदेहेनाणुदित्सूत्रजबोधानापत्तिः॥ न चैतद्वाक्यार्थबोधात् प्राक् निश्चय इति॥ होढ इ
हौकारेण कार्यग्रहणे सतिय घस्त्राप्नोति तस्य सर्वस्याप्युपलक्षणमिदं॥ ननु यण्सवर्णानामप्रसिद्धेर्जग्रहणेनै
व सिद्धे अण्ग्रहणं व्यर्थमत आह॥ यवला इति॥ अमी तु नानुनासिका इति सिद्धान्तकौमुद्यामुक्तं॥ तेन संयंते त्यादौ प
रसवर्णनिष्पन्नानुनासिकयवलानामनच्त्वेति द्वित्वं सिध्यति॥ हलो यमामिति लोपस्तु वैकल्पिकः॥ अत्रेदं बो
ध्यं॥ आकृतिः पदार्थो गुणाभेदकाः इत्यभिमानेनात्र सूत्रे अण्ग्रहणमिति॥ अतो भिस इत्यादौ तपरकरणात् सह्विवृतो
रिति सूत्रस्थवर्णग्रहणाख्यानाद्यतपरपदं वकुञ्चिहिंपचमानसुरुषाविभाह॥ तपर इति॥ इत्यादिना॥ वर्णग्रहणे
कृतसामर्थ्यादित्वावच्छिन्नवर्णग्रहणबोधनेन न तपरस्य प्रवृत्तिः॥ आद्योदाहरणमतो भिस इति॥ अतो
दाहरणं वृद्धिरादैजिति॥ यद्यप्यत्र संज्ञातास्वरा न च तत्कालिकास्तत्सवर्णा वाप्रसिद्धस्तथापि तपरकरण
तं॥

भाष्यप्रामाण्याच्च तत्परशब्दबोध्यो वर्णः स्वसमकालत्वाद्भकइत्यर्थेनादोषः॥ इदं च विध्यर्थमेव अणग्रह
णानुवृत्तेः॥ गुणानामभेदकतया नणि विधित्वेपि वृद्धिरादैजित्यादावाकारांशे सावकाशेनानेनातो भिसऐ
त्यादेपरत्वेनाणुदित्सूत्रबाधः॥ संख्याकृतव्यवहारस्य परस्परपरिहारेणैव दृष्टत्वेद्विरोधस्यसत्त्वा
त्॥ गुणानामभेदकत्वेत्वनवकाशत्वाद्बाध इति बोध्यं॥ अत्रावध्यवधिमतोः साजात्येन वर्णस्यैव संज्ञा
वृ त्वेपि विशिष्टाद्विभक्त्युत्पत्तिः सौत्रत्वात् बोध्या॥ तत्कालस्येत्यस्य तदुच्चारणकालसमकालस्येत्यर्थस्तदाह॥ स
मकालस्यैवेति॥ एवकारो न्यायसिद्धबाध्यबाधकभावस्यानुवादक इति भावः॥ जातुपदेतु नियमार्थमेव स
वर्णग्रहणानुवृत्तेः॥ एवं गुणानामभेदकत्वमिति वृद्धिरादैजितिसूत्रभाष्यसंमतसिद्धांतपक्षेपि नियमा
त्या र्थमेव इदमाद्गुणइदोविभक्तितकारेणानप्रवर्त्ततोउपसर्गाद्दीतितपरकरणात्॥ ऋदोरप्इत्यादेस्तकारस्य
एवेति न दोषः॥ स च पंचमीसमासाभावे तकारइवोच्चारणार्थो मुखसुखार्थो वा॥ तपरसूत्रे दकारप्रश्लेषपक्षे
तु धकारादित्स्थानिकोदकारो बोध्यः॥ ॥वृद्धिरा॥ वृद्धिरात् ऐजितिपदत्रयमिति न समासांतादिप्रवृत्ति
रीकांतपकरणमसंदेहार्थतयापूर्वार्थं प्रकृतसूत्रेभाष्ये अत्रशास्त्रेगुणानामभेदकत्वं ज्ञापकादाश्रित
सवर्णग्रहणार्थत्वाभावस्योक्तत्वात्॥ ऋसौत्कं व्यंगं गोघ इत्यादौ त्रिमात्रयावृत्तयेपराथमपि वृद्धिशब्द
त्रपदपरोऽप्यपरत्वासंभवात्॥ आदैचोवृद्धिपदाभिन्ना इति वाक्यार्थः॥ पदपदार्थयोरभेदात्पस्यांगीका ॥२८॥
रात्॥

रामेति॥ वस्तुतं नाम मानभंगः पिनाकिन इत्यादौ तयोरभेदप्रतीतेरनुभवसिद्धत्वादित्यन्यत्र विस्तरः॥ वृद्धिश
ब्दस्य संज्ञात्वं तु व्याख्यानात् विधेयत्वेपि तस्य पूर्वपाठो मंगलार्थः॥ अष्टकरएकावित्यादौ तथा करणं विधेय
स्य प्रथमं प्रयोगे असाधुत्वभ्रमवारणायेति भाष्ये स्पष्टं॥ सर्वशब्दानां सर्वार्थवाचकत्वेपि वाचकत्वस्य ग्र
हीतस्यैव बोधजनकतया संज्ञासूत्राणामज्ञातशक्तिज्ञापकतया विधित्वं॥ किं च सर्वे सर्वार्था इत्यस्तु प
गमो योगिदृष्ट्या नास्मदृष्ट्या॥ सर्वसब्दानामर्थानां च विशिष्य ज्ञानाभावात्॥ सामान्यतस्तत्पाज्ञानं च
न बोधोपयोगि शास्त्रं त्वस्मदाद्युद्देशेनैव प्रवृत्तमिति बोध्यं॥ तत्रैव संकेतग्राहकत्वं शास्त्रकरणं स्वेच्छ
येवेत्येषां यदृच्छाशब्दत्वेन व्यवहारः स्वेच्छया संज्ञाः क्रियंत इति च एतदुपदेशरूपसंकेतात् प्राकृतत्वसं
ज्ञात्वाग्रहणेन तासामनित्यत्वव्यवहारः॥ अत एव तत्संज्ञाकरणज्ञानरूपप्रकरणादन्यार्थीग्रहणेरूपनि
यमः॥ कृत्रिमाकृत्रिमन्यायस्तु तयोक्तः संख्यासंज्ञासूत्रे भाष्येआर्थिकमेवामुं नियममादायसंज्ञी॥
सूत्रेषु नियमत्वव्यवहारो व्यवहारायनियमः संज्ञायाः संज्ञिनि कैश्चिदित्यादिना कृतः वाचकताबोधक
त्वेपि तदनुत्पादकत्वान्न शब्दार्थसंबंधनित्यताहानिः॥ आसां च शिष्टप्रयुक्तत्वात्साधुत्वमित्यन्यत्र वि
स्तरः॥ कार्यकालपक्षेपि मृजेर्वृद्धिरित्यादौ वृद्धिपदार्थजिज्ञासायां वृद्धिरादैजित्युपस्थितातदर्थबो
धरूपेशक्तिग्रहेवृत्ते विधिवाक्यार्थबोधः॥ अत एव ष्यङः संप्रसारणमिति सूत्रे भाष्ये कार्यकालसं

त.श.शे.

संज्ञापरिभाषंनस्येत्युपस्थितेःमिदन्नवतीत्याचिभमितीत्युक्तंईदूदेतिसूत्रेभाष्येऽपिकार्यकालंसंज्ञापरिभाषंप्र
गृह्यःप्रकृत्येत्युपस्थितमिदंभवतिईदूदेद्द्विवचनंप्रगृह्यमितीतिनिर्दिष्टेतिसूत्रेकैयटोऽपिनिर्दिष्टेत्युक्तेसंज्ञावाक्ये
क्तंकवतुनिर्दिष्टेतिस्मर्यतइत्यतआह॥अत्रपक्षेएकत्रशक्तिग्रहेऽपि तत्प्रदेशस्यैवतत्रार्थेशक्ति
रितिसंभावनयाप्रदेशान्तरस्थेबोधोनस्यादितिसर्वप्रदेशेषुतत्तत्प्रदेशशक्तिग्रहःसर्वकेविधिवाक्यार्थबो
धः यथोद्देशेतुएकदेवशक्तिग्रहात्सर्वत्रबोधइतिविशेषः॥एतेनकार्यकालपक्षेतत्परत्वंस्पष्टार्थमेवा
दैचूपदार्थस्पष्टादिविशेषणंतयाविधेयत्वेनसवर्णग्रहणप्रसक्तेःयत्रदृष्टिपदंतत्रादेजित्युपतिष्ठत
इतिक्रमेणसंज्ञासूत्राणामर्थादिस्तित्यपास्तइत्यन्यत्रविस्तरः॥अत्रातन्त्राविताानामपिश्रादेचूयायरु
णंतेनशालीयादिसिद्धिः॥ ॥भूवादयोक्रियावाचिनःकिंविकल्पार्थकवाशब्दस्यनिपातस्यधातुत्वेप्रा
तिपदिकत्वात्सुब्भावेपदत्वापत्तेः॥तदुक्तौतुनदोषःवार्थस्यविकल्पस्यभूतभविष्यत्कालसंबंधा
भावेनक्रियात्वाभावात्॥अस्याद्यर्थस्यापितत्त्वंभूतभविष्यत्कालसंबंधात्नोदयस्यकिं॥आणवयति॥
वट्यतीत्यादिनांधातुत्वेशास्त्रविषयतयासाधुत्वापत्तेःसूत्रशेषेभाष्येस्फुटमेतत्॥स्तंभ्वादीनामुदि
त्वेनधात्वधिकारविहितकार्याद्दिनेयत्वादिनास्थितत्रंशानुमानतस्युदोषः॥प्राग्रीश्वरा॥अधिरीश्वरइ
त्यभिव्याप्यप्राग्निपाताइत्यधिकारःप्राक्निपाताःसंतोगत्यादिसंज्ञाइत्यर्थःतेनताभिःसम्मा ॥१२९॥

वेशः अधिरीश्वरेविभाषाकृञिइत्यत्रनिपातपदसंबंधस्यसिद्धिःएषांद्योतकत्वंवाचकत्वंचयथाकार्यंयथाप्रयोगं
बोध्यमित्यन्यत्रविस्तरः॥असत्त्वेतिपूर्वसूत्रस्थलाघवादित्याह॥अद्रव्येति॥विशेष्यतयाद्रव्याभिलापइत्यर्थः॥तेन
क्रियाविशिष्टद्रव्यवाचिनांविप्रादिघटकप्रादीनांन॥चादयःकिं॥स्वरादिपठितानामसत्त्वेचतत्त्वेआद्युदात्तत्वे
माभूदितिउपसर्गयोगग्रहणंयद्येवंप्रादीनामन्वयस्तंप्रत्येवोपसर्गत्वादीत्यर्थबोधनायतेनप्रगताःसेचकाःअस्मा
त्प्रसेचकोग्रामइत्यादौषत्वंनगतिश्चेतिउपसर्गसंज्ञासमावेशार्थः॥तेनप्रतिप्रलीतमित्यादौगतित्वात्प्रतिरन्तं
तरइतिस्वरःउपसर्गत्वात्णत्वंचसिध्यति॥प्रादयःइतियोगविभागस्तुक्रियायोगाभावेऽपिनिपातत्वाय॥ए
तेनश्रीक्षुमेवोपसर्गप्रतिरूपकस्यनिपातत्वमुक्तं॥चाद्यंतर्गणसूत्रेणेतिदिक्॥प्रपरेत्यादवनुकार्यानुकर
णयोरभेदविवक्षयासुबनुत्पत्तिः॥ ॥निसदुसितिति॥अत्रेदंबोध्यं॥सांतग्रहणेरांतस्याग्रहणमेव॥यत्रतुरु
त्वमसिद्धत्वंतत्ररांतग्रहणेऽपिनसांतग्रहणेनतद्ग्रहणात्रुत्वस्यासिद्धत्वात्॥यत्रतुरुत्वस्यासिद्धत्वंयथाषत्वणत्व
योस्तद्विषयोपसर्गत्वप्रतिषेधपरेदुरःषत्वणत्वयोरितिवार्त्तिकेरुतरेफसांतस्यापिग्रहणंषत्वणत्वयोरि
त्यस्यतद्विधायकशास्त्रयोरित्यर्थात्॥अतएवसुषामादिषुदुःशब्दपाठःसार्थकःसदित्रपदुःसुषुस्थःकुरिति
दुःपूर्वकस्थाधातोःकुप्रत्ययेसाधुःअन्यथादुःपूर्वकात्कुप्रत्ययेउपसर्गादित्येवषत्वेसिद्धेतद्वैयर्थ्यंस्पष्टमेव॥
नचास्यरुत्वेनावयवार्थाभावादुपसर्गत्वाभावः॥अत्यंतरूढेषुप्रतिष्ठानिष्ठादिषुषत्वानापत्तेः॥अर्थव
त्त्वारोपेणचेत्प्ररूढेऽपिदुःसःपाठस्तुदुरयतइत्यादौरुत्वासिद्ध्यालत्वाभावार्थइतिदिक्॥ ॥नवेति॥इति

अ०शा०शे० २०

कत्व

ऽोकेर्थपदार्थकस्यशब्दपदार्थकत॥यथागवित्ययमादेत्यादावनुकरणेऽस्तुस्वंरूपमितिपरिभाषणाच्छब्द
पदार्थकत्वंकृतंक्वचिदिति:नपदार्थविपर्यासकत्वंयथानुवादवाक्येसचनवाशब्दाभ्यांप्रत्येकंसंबध्यतेवा।
ख्यानात्॥नेननवाशब्दयोरर्थौसंज्ञिनौस्वंरूपमित्यस्यप्रत्याख्यानेतितिशब्दोप्यर्थपरवार्थेकार्यस्याबाधात्॥
तयोरेवसंज्ञित्वेतुविभाषाश्वेरित्यादेनवाशब्दावादेशेस्यातां॥प्राप्तविभाषास्तुनास्योपयोगः॥
नासांपक्षेनिवृत्तिमात्रफलकत्वात्॥अप्राप्तविभाषास्वपिन।नासांपक्षेविधिमात्रार्थत्वात्।अप्रा
तत्वेननिषेधासंभवाच्च।तस्मादुभयत्रविभाषार्थमिह।विभाषाश्वेरित्यादौएतरभावेयदिविधि
मुखेनप्रवृत्तिस्तर्हिमित्येवविकल्पःस्यात्।किन्तुनित्यमेवसंप्रसारणंस्यात्।निषेधमुखेन
प्रवृत्तौकित्त्वेवप्रवर्तेतनपित्सुउभयथाप्रवृत्तिस्तुवैरूप्याद्वाक्यभेदापत्तेश्चाशक्यासंज्ञाकरणेतुश्रुत
क्रमानुरोधात्पूर्वंकित्सुनिषेधस्ततःकिदकिद्रूपेसर्वस्मिलिटिएकरूप्यंज्ञापितेसतिपक्षेभवतीत्येकरू
पेणविधिमुखेनैवविकल्पः॥भाष्यकृतस्तुएवंहिहक्रोरन्यतरस्यामित्यादावनुपपत्तिर्विभाषापदभावा
त्॥इतिशब्दस्यविशेषेत्यत्रापिसंबंधात्विशेषपदार्थः॥संज्ञेतितुनयुक्तं॥अर्थसंज्ञात्वस्यादृष्टत्वा
त्॥अर्थान्तिर्वृत्तिप्रशब्दसंज्ञेत्यपिनयुक्तं॥एकस्यार्थस्यसमानफलकानेकसंज्ञाकरणस्यानाकूतिः २०

संज्ञेतिवृद्ध्यादिसंज्ञासूत्रस्थभाष्येणतिरस्कारात्॥तस्मात्तत्रलक्ष्यानुसारेणोभयमुखेनप्रवृत्तिर्वाच्ये
तिविभाषापदघटितेपितथैवास्तु॥किंसूत्रेणेतिजातिव्यक्तिपक्षयोरपिसूत्रंप्रत्याचख्युः॥स्वरूप॥स्वंरूप
मित्यस्य:बोध्यमितिशेषोव्याख्यानात्तदाह॥संज्ञीति॥राज्ञोयदित्यादौसौ।किकव्युत्पत्तोपस्थितार्थस्यप्रस
येनपौर्वापर्यासंभवात्प्रातिपदिकादित्यनेनान्वयसंभवाच्चतदर्थसंभवाच्चके शब्दमात्रग्रहणापत्तौनियमार्थत्स
त्रं॥तत्रस्वशब्दःआत्मीयत्वेनार्थमाहरूप॥शब्देनशब्दरूपमेतदुभयंसंज्ञीत्यर्थः॥तत्रार्थोनविशेषउक्त
युक्ते:॥किंतुशब्दविशेषणंएवंचार्थविशिष्टःशब्दःसंज्ञीत्यर्थवत्ग्रहणपरिभाषासिद्धात्रचार्थ:क
ल्पितान्वयव्यतिरेककल्पितःप्रकृतिप्रत्ययादिबोध्यः॥शास्त्रीयोपिसमुदायचमुख्यःप्रसिद्धश्चेतिगोण
मुख्यन्यायोभिव्यक्तपदार्थायेइतिन्यायश्चसिद्धः॥अपतएवेयंविशिष्टरूपोपादानेएवेदंसूत्रंच॥तत्रै
चार्थोपस्थितेस्तत्रैवानियमप्रसक्तेश्चनतुवर्णग्रहणेइत्याशयस्पष्टं॥दाधाघ्वित्यस्येरुलघोरित्यादौचा
रितार्थ्येनोपसर्गेघोरित्यादौस्वंरूपमित्यनेनपरत्वाद्बाधशंकावारणार्थमशब्दसंज्ञेतिनात्रषष्ठीतत्पुरु
षःकर्मसंज्ञादेरर्थसंज्ञात्वेननिषेधाप्रवृत्तौकर्मण्याणित्यादौस्वरूपग्रहणापत्तेः॥किंतुसप्तमीतत्पुरुषः
शब्दपदेनचशब्दशास्त्रंतदाह॥शब्दशास्त्रेइति॥भाष्येतुअर्थेकार्यस्यबाधेप्युपस्थितत्वाच्छास्त्रे

इत्याहोतत्जन्यबोधेप्रकारतयाभासमानस्यराजन्शब्दस्यैवग्रहणंभवष्यतीतिव्यर्थंसूत्रं॥उपस्थितार्थस्यागे
मानाभावेनतस्याविशेषणतयान्वयसंभवेनार्थवत्परिभाषापिसिद्धान्तस्यानुसारात्ततसंज्ञाकरणंज्ञानरूपप्र
करणाच्च षांतसंख्यावाचकषषशब्दस्यषट्संज्ञाकरणेनशब्दशास्त्रीयसंज्ञायांस्वरूपायग्रहणंज्ञापनाच्चोपसर्गेवा
रित्यादावपि षेणाशब्दसंज्ञेत्यपिव्यर्थंमिस्फुटं॥अतएवजनपदपत्यपशुदेवतादिशब्देषुनदोषो॥अतएवग्रहणा
दिषुविशेषाणांग्रहणंस्वेषुषइत्यत्रपर्यायाणांविशेषाणांस्वरूपस्यचग्रहणंसभाराजेत्यत्रपर्यायाणामेवग्रहणंप
ल्विमत्स्यमृगादीनांहरिणमृगपक्षिणोः पर्यायाणांविशेषाणांस्वरूपस्यचग्रहणंमत्स्यपदेनस्वरूपस्यविशेषाणांमीन
रूपपर्यायस्यचग्रहणंसिध्यति॥अन्यथानिदर्शयत्नःकर्त्तव्या॥परेश्वघांकयोरित्यत्रघञ्शब्देनस्वरूपग्रहणंनदी
पौर्णमासीत्यत्रनदीपदेनस्वरूपग्रहणंचसिध्यसि॥लक्ष्यानुसारिव्याख्यानेनचममसर्वेष्टसिद्धिः॥ज्ञापकपक्ष
पिज्ञापकसिद्धस्यासार्वत्रिकत्वान्नदोषः॥अतएवन्नगृवताज्ञापकेनासिद्धंवचनंप्रत्याख्यातमितिदिक्॥
येनेतिकरणेतृतीयाविधिरितिभावेकिःकर्मात्रविधेयंकर्त्ताचाचार्यःप्रसिद्धतात्स्वातएव॥प
तुकरणंकर्तृपरतंत्रमितितृतीयपारतंत्र्यंलक्ष्यतेतच्चशब्दानांविशेषणत्वेतिविशेषणमितिलब्धमि
तितन्नसुपविभक्तौनलक्षणेत्यस्यसर्वसंमतत्वात्॥किंबहुनाचेषांप्रत्ययानामन्येषांवाशब्दामर्थेवि
धानंकृतंशास्त्रेणतेषामन्यत्रार्थेतदर्थेचान्येषांलक्षणयापिसाधुत्वाभावस्यप्रत्ययस्पुंयोगादित्यादिना ॥२१॥

२

प्रयोगेष्पतोलाभात्॥करणस्यव्यापारवत्वनियमादन्येषांचव्यापाराभावाद्विशेषणमेवात्रकरणतृतीयांते
नोच्यतेतस्यचेतरव्यावृत्तिकरणमेवव्यापारः॥तदुक्तंनाय्येयेनेतिकरणएषात्तृतीयान्येनचान्यस्यविधिर्न्नविति
सकार्यंयस्मिन्यंतश्चतयोरकरणत्वंदर्शितं॥अन्यस्येत्यन्यस्मिन्नित्यस्याप्युपलक्षणंतत्रशब्दोपस्थितिविशे
ष्यस्यतादृशविशेषणमेवतस्तथारूपिकं॥कचित्सगतिगमकेऽनादृशंशब्दरूपंविशेष्यमादायापितदंतविधिः
तच्चांतरंगत्वात्समानाधिकरणमेव॥तत्रतदंतविधौसतितयाविशेषणत्वयोग्यताप्येतत्रदृत्तोनिमित्तं
अतएवेकनित्यादौइनंत्रोतदंतविधिर्नहीनांगमित्यन्वयोभवतितदंतस्येत्यस्यतदंतशब्दस्येत्यर्थः॥नन्वेव
मेरजित्ययइत्यत्रनस्यादत आह॥स्वस्यचेति॥स्वमित्यनुवर्त्तंषष्ठ्याविपरिणम्यतइतिभावः॥स्वंरूपमित्
त्यस्यप्रत्याख्यानेतुतदंतस्यचेतिपाठ्यमितिबोध्यं॥समासप्रेति॥विशेषणविशेष्यभावव्यत्यासेतात्पर्य
ग्राहकमिदं॥एवंद्वितीयाश्रितेत्यादौश्रितादयोऽधिकाप्राप्तसमर्थैरित्यस्यविशेषणत्वाइतिनतदंतवि
धिःतस्यतत्प्रकृतिकेलक्षणयाप्युपेत्यनेनान्वयःतेनकृष्णंपरमाश्रितइत्यत्रनसमासःनडादिभ्यःफगि
त्यादावपिनडादिविशेष्यंप्रातिपदिकंविशेषमितिसोत्रनाडिरित्यत्रनफक्॥ ॥उगिदिति॥तेना
तिभवतीत्यत्रोगितश्चेतिङीप्॥दाद्विरित्यत्रातद्रन्चश्सिद्धः॥एवंचोक्तनिषेधःप्रत्ययात्रोगिद्ग्रहणमाण

ल॰ श॰ शे॰

प्रातिपदिकविषये प्रत्ययविधिविषयेण गृह्यमाणप्रातिपदिकेन तदन्तविधिर्नास्तीत्यनेनैकवाक्यत्वसंभवा
दुगिदचोनित्येकदेशानुवाद इति बोध्यं॥ अत एव चवनोरचेत्यादौ प्रत्ययग्रहणे तदन्तग्रहणमित्यस्य नायं नि
षेध इति दिक्॥ विरामः॥ भावे घञ्॥ शब्दानुशासनप्रस्तावात्सह। वर्णानामिति॥ उच्चारणाभाव इत्यर्थः॥ स
च व्याख्यानात्किंचिदुच्चारणानन्तरकालिक एव गृह्यते॥ प्रदेशाः गवावसानइत्यादयः॥ अन्त्यावस्थापि बुद्धि
कृतं पौर्वापर्यं वर्णवत्॥ परशब्दो नान्यार्थो नित्यत्वस्याभिचरितत्वादत आह॥ अतिशयितेति॥ स्वभावसि
द्धार्धमात्रातिरिक्तकालव्यवायेन रहितः तेन तद्व्यवायेन वाक्योच्चारणे संज्ञानसंनिकर्षश्च प्रायः परेण क्वचित्सू
त्रेणापि॥ अत एवावसानकार्याणां संहिताधिकारे पाठः॥ न चावसानसंज्ञया परसत्वे सावकाशाया संहि
तासंज्ञायाः सत्यपि संभवे बाधनं भवतीति न्यायेन विषयभेदेपि बाधः स्यादिति तदसंगतिरेवेति वाच्यं॥
तदधिकारे तेषां पाठेनाकडारसूत्रस्य स्वशास्त्रीयसंज्ञामात्रविषयत्वकल्पनात्॥ एतेन तु न तयोः लौ
केपि सत्वात्॥ तदुक्तं वार्त्तिककृता संहितावसानयोर्लोकविदितत्वादिति न चावसानकार्येषु संहिता
धिकारासंबंध एवास्त्वन्यथेच मंडूकप्लुतिरस्त्विति वाच्यं॥ सत्यामुपपत्तौ मंडूकानुवृत्तेरयुक्तत्वात्
॥ ध्वानितं नोर्दंत्यविसर्जनीयस्य स इति सूत्रे भाष्ये संनिकर्षः सामीप्यं॥ सुप्तिङंतं॥ सुबिति सुपः पका ॥२३॥
रेण प्रत्याहारो व्याख्यानात्॥ यद्यपि प्रत्ययग्रहणे तदन्तग्रहणमित्युक्तेः शब्दरूपं विशेष्यमादाय तदन्त

ख्या

ग्रहणं सिद्धं॥ प्रत्ययेन स्वप्रकृत्यवयवकसमुदायस्याक्षेपात्तद्विशेषणत्वेन तदन्तविधिरिति न युक्तं॥ इयानि
त्यादौ प्रत्ययग्रहणे तदन्तग्रहणाभावज्ञापनार्थमेतद्ग्रहणं तेन घसंज्ञातरतमयोरेव न तदन्तस्य तेन गौरिब्रा
ह्मणितरेत्यत्र न ह्रस्वः॥ एतन्निषेधसामर्थ्यादेव प्रदेशेष्वपि न तदन्तविधिः॥ न च संज्ञापितेपि व्यर्थं॥ पदप्रदे
शे प्रत्ययग्रहणे तदन्तग्रहणेनैवासिद्धेरिति वाच्यं॥ पदत्वस्य प्रकृतिसाधारणतया पदग्रहणे प्रत्ययग्रहण
स्यैवाभावात्॥ यस्मात्प्रत्ययविधिरित्याद्यनुवृत्तेः पदसमुदायस्य न पदत्वं॥ इयानित्यादौ यस्मात्प्रत्ययवि
धिस्तदादित्वे तांतत्वं व्यपदेशिवद्भावेन बोध्यं॥ तेनाशास्त्रीयस्याप्येकाचो देरिति देशात्॥ विशिष्टनि
ष्ठव्यवहारनिमित्तकार्याणि अस्साहाय्येपि कर्त्तव्यानीति तदर्थात्॥ अत एवेयन्मात्रमित्यादौ वत्वं तात्वा
र्थं इति मात्रच् सिद्धिः॥ हरिषु इत्यादौ सोः स्थानिवत्त्वेन पदत्वं हलि सर्वेषामिति निर्देशेन सत्यपि येतदप्रवृत्तेः॥
निजो चत्वार एकाच इति भाष्यं त्वसुपेत्यवादेन ध्वानितं चेदमादेश्च उपदेशे तास्वनुदात्तेदित्यादौ भा
ष्ये तत्र हि ठौक तद्दौ [illegible]कारस्य हन इत्यादावकारस्येजंतोपदेशत्वं नकारांतोपदेशत्वं व्यपदेशिवद्भा
वेनाशक्यार्थवता व्यपदेशिवद्भाव इत्युक्तं॥ यो वर्णोऽर्थवान्न तेन व्यपदेशिवद्भावः वर्णसमुदायस्यार्थवि
चेयायेत्याद्यवसरायेएवन तु प्रकृते इति तदर्थः॥ एवं चेकस्मिन्नित्यस्यापोर्थवितेत्यनेनोक्तः इति

ल॰श॰शे॰ रिकं ॥ हलोनं ॥ गर्गाः शतं दंड्यतामित्यत्र समुदायेऽशतदंडनवत् समुदायस्यैव संज्ञा न प्रत्येकं ॥ अनंतरा
इत्यनेकेऽपि ॥ तस्य विशेषणतया एवौचित्यात् ॥ यत्तु संपुज्यं तेन रणायत्रेत्यन्वर्थसंज्ञाबलान्न प्रत्येकं संज्ञेति
तन्न ॥ घटपटौ संयुज्येते यत्र त्यादौ संयुज्यमानपदार्थातिरिक्तस्यैवान्यपदार्थतया प्रतीत्युत्पन्नत्वेन
तदतिरिक्ततद्घटितपदवाक्यरूपसमुदायस्य संज्ञापत्तावनिष्टापत्तेः महासंज्ञा तु प्राचामनुरोधादे
व ॥ तेन सुदृषत्प्रासादेत्यत्र संयोगांतलोपेनेत्यन्यत्र विस्तरः ॥ हल इति बहुवचनं सौत्रं यथा हलोऽचर
श्चेत्येकशेषः ॥ स्वरितात् संहितायामिति सूत्रेनुदात्तानामिति पदे तथैकशेषस्य भाष्यकरणात् तेन
द्वयोरपीति शिक्षेत्यादौ गुरोश्च हल इत्यप्रत्ययः ॥ सिध्यतियत्रापि बहवः श्लिष्टाः तत्रापि द्वयोर्द्वयोरेव न
बहूनामेव ॥ झलि परे संयोगादिलोपविधानात् बहूनामपीत्यपि चिंत्यमेव फलाभावात् ॥ तत्रातत्रां
ग पदधात्ववयवसंयोगस्यैवाश्रयणेन तादृशस्यैव त्रयाणां संयोगस्याभावादिति भाष्ये स्पष्टं ॥ आनंत
र्यं व्यवधानाभावो व्यवधानं च विजातीयेनैवेत्याशयेनाह ॥ ज्ञाभिरिति ॥ अत्र कुत्वं न प्राप्यं ॥ अत एव हयव
रट् सूत्रे चोक्तमिति भाष्यप्रयोगे कुत्वं छंद्रूपते स्वरैरेव वदिताइतेत्याचितावृत्तिः हलः ॥ किं तितउ देव अत्र गुरो
रिति प्लुतः स्यात् ॥ अनंतराः किं दृषद् सं ॥ अत्र सकारमकारयोः संयोगत्वे स्कोर्लोपः स्यात् ॥ संयोगे गु
रु ॥ भेत्तेत्यादौ गुणत्स्वुक्तौ ॥ कित्त्वसामर्थ्येन भूत् पूर्वलघूपधगुणाद्बोध्यः ॥ इति संज्ञेति ॥ प्रथम ॥ ॥२३॥

नां
प्रायस्थानां संधिकार्योपयोगिनीं संज्ञानां प्रकरणमिति समाप्तमित्यर्थः ॥ तेनाग्रेऽपि प्रगृह्यसंज्ञा
लोपसंज्ञानुपन्यासेऽपि न क्षतिः ॥ अत्र इत्याद्युपन्यासस्तु प्रासंगिकः ॥ ॥ इति संज्ञाप्रकरणं ॥ ॥
इको गुणवृद्धी ॥ परिभाषेयं व्याख्यानात् ॥ गुणवृद्धिशब्दाभ्यामिति ॥ गुणवृद्धिग्रहणानुवृत्त्यैव
सिद्धे पुनर्गुणवृद्धिग्रहणसामर्थ्यादिति भावः ॥ अनुवर्त्तमानं च संज्ञिपरमेव स्यात् संज्ञाकरणे नान्य
त्र संज्ञिपरत्वात् ॥ यद्वा तदप्यनुवर्त्य गुणवृद्धी इति योजनयैव लब्धा जः ॥ ष्ठ्यादिषिति सूत्रेऽनुवृत्त
ष्टां पदस्य संज्ञापरतया गृहीत्वा त[illegible]नेति सूत्रे संज्ञैरव्यापदस्य तदंतत्वासंभवादर्थपरतेति बो
ध्यं ॥ लक्षणप्रतिपदोक्तपरिभाषया तु नात्र निर्वाहः ॥ तत्र प्रतिपदोक्तस्येत्यस्य साक्षादुच्चारित
स्येति साक्षात्तच्छब्दानुवादेन विहितस्येति वार्थात् ॥ ध्वनितं चेदमत्रैव भाष्येऽस्या अविधेयस
मर्थक गुणवृद्धिपदश्रुति लिंगं तदाह ॥ विधीयते इति ॥ अत एवातोऽगुणे वृद्धिर्यस्ये[illegible]त्यादौ न दोषः
एतेन शब्दपरयोः सर्वथा गुणवृद्धिपदयोरनुवृत्त्यापत्रत्र पदत्वे उपतिष्ठते इत्यर्थेन तस्य द्वि
नाम इत्यादिव्यावृत्तौ सिद्धायामिको गुणवृद्धीति व्यर्थमित्यपास्तं ॥ एतेन [illegible] एवाविधेयोप

ल.श्रा.श्री

॥ रिभाषोपतिष्ठते नानुवादे इत्यकृद्घोषः॥ एवंच पदोपस्थापकपरिभाषा विषये विधीयते इत्यस्यैवाभ्या
हारो बोध्यः॥ एवं तस्मिन्निति निर्दिष्टे षष्ठी स्थानेयोगेत्यादेरनुवादेऽपि प्रवृत्तिः॥ तेन प्रत्ययस्थात्कात्पूर्वस्यो
दात्तस्वरितयोर्यणः इत्यादौ न दोषः॥ उदीचामातः स्थाने इति स्थानेयग्रहणं तु स्पष्टार्थमेव॥ तत्र विधिर्वाक्येऽ
परिभाषायां विधेयविभक्तित्वेन तदंतस्य विधेयसमर्पकत्वान्निर्णयः॥ अत एव गुणादिपदानामिकः पदोपस्थाप
नेन चारितार्थानामपि वाक्यार्थान्वयिता॥ तदर्थस्य तदंतचयितेविधेयत्वाभावेनोपस्थापकत्वस्यैवानंगी
पत्तेः॥ इयं च एधितेत्यादौ व्यंजनानां गुणव्यावृत्त्यर्था भिन्नमित्यादौ निषेधप्रवृत्त्यर्थं इग्लघु एत्वसंपत्त्यर्थं च
ति दिक्॥ ऋत शब्दे रिति॥ ऊकालोऽज्झ्रस्वदीर्घप्लुत इत्यजिति चानुवर्त्तते॥ ह्रस्वेत्यादिपदं च ह
उ तीयया विपरिणतमिति भावः॥ तन्व्येवं देशेन आचिन्तक्रो वित्यादावेतन्न पश्चिति शेषं प्राग्वत्॥ ॥
आद्यंतौ॥ यद्यप्यत्र मिलितस्यनैकोत्रान्वय इति द्वंद्वेन प्राप्नोति तथापि समस्तयोरन्वयबोधोत्तरं यथासंख्य
मिति सूत्रारंभसामर्थ्यात्पुनः प्रत्येकान्वयः लोके त्वेवंरीत्या प्रयोगोऽसाधुरेवेति भाष्ये स्पष्टम्॥ अत्रैव यथा
संख्यसूत्रोपन्यासो युक्तः॥ द्वंद्वान्ते श्रूयमाणस्य प्रत्येकं शब्दस्य प्रत्येकं संबंधः॥ पुरस्तादपवादन्यायेन स्थानेयो
गत्वस्यायमपवादः॥ प्रत्ययपरत्वं तु परत्वादमुं बाधते तेन चरेष्टाद्यः परा एव भवंति॥ अत एव यत्रै
तत्प्रभावे स्थानषष्ठीसंभावना तत्रैवेदं प्रवर्त्ततेति दाह॥ यस्याकाव्विति॥ अघंताच्छितावयवीयस्य ब्दा २८